ईशावास्यवृत्तिः

विनोबा

रूपान्तरयिता:-

पूर्णप्रसादः 'ब्राह्मणः'

प्रकाशकः– पूर्णप्रसादः ब्राह्मणः
आवृत्तिः– प्रथमा
संख्याः– १०००

तिथिः– २०२७ तमे वैक्रमाब्दे
मूल्यम् रु. ४।–

मुद्रकः–
फाइन आर्ट प्रिन्टिङ्ग प्रेस,
बटु चिकंअट फोन १२०३०

समर्पयाम्येतमनुवादम्

'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया;
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्जनः'

एवं भावयद्भ्यः कुर्वद्भ्यश्च
विश्वबन्धुभ्यः !

मंगलाचरणम्

यत्कृपा मां प्रेरयति सदा यज्ञियकर्मसु
समीमांसं गमयति चाऽऽर्यगृह्येषु वर्त्मसु-
तत् सद्गुरुपरब्रह्म जुनानाथसमाह्वयम्
प्रणम्येशावास्यवृत्तेरनुवादं करोम्यहम्

विनीतः
पूर्णप्रसादः 'ब्राह्मणः'

निवेदनम्

अर्थसारदृशा भाषासु संस्कृतम्, संस्कृतवाङ्मयेषूपनिषद्, उपनिषत्स्वीशावास्योपनिषच्च सर्वतो महिमाऽतिशयं, गरिमाऽतिशयं च बिभर्ति । यतः क्वचिदाधाराऽधेययोर्व्यत्यासेन सभङ्ग्यन्तरेण, क्वचिच्च न्यूनाधिकमेकतात्पर्येण शब्दविन्यासेनाऽस्या एव प्रायो भावनानां चर्वितचर्वणं कुर्वन्त्यन्याऽन्या उपनिषदः । यथा 'ईशावास्यमिदं सर्वम्' इतीशावास्यप्रोक्तमेव भावमावर्तयन्ति क्रमशः कठमुण्डकमाण्डूक्योपनिषदः— 'तस्मिँल्लोकाः श्रिताः सर्वे' । 'पुरुष एवेदं विश्वम्' । 'सर्वं ह्येतद् ब्रह्म' इति । किञ्च— 'यस्मिन् सर्वाणि भूतानि आत्मैवाऽभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इतीशावास्य-व्यक्त भावमेव व्यनक्ति बृहदारण्यकोपनिषद्— 'यत्र त्वस्य सर्वमात्मैवाऽभूत् तत्केन कं पश्येत्' इति । महान्तं विभुमात्मानं मत्वा धीरो न शोचति' इति चाऽन्यत्र । किञ्चेशावास्येन 'ईशावास्यम्, इदम्, सर्वम्' इति शब्दत्रयेण प्रबोधितमर्थमितरा (उपनिषद्) पूर्णेन श्लोकेन प्रबोधयितुं यथाकथंञ्चिदिव पारयते । यथा नारायणोपनिषद्— 'यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति ।

विश्वमनीषिभिः कीर्तितनामानो विनोबा महोदया (मूललेखकाः) यथाऽभिप्रयन्ति — ईशावास्येऽपि मन्त्रान्तराऽपेक्षया प्रथममन्त्रस्याऽस्ति वर्णनाऽतीतो महत्त्वाऽतिशयः । येन भक्तराजस्य तुलसीदासस्य (उपमितेन) कण्ठस्थ 'रामदीपेन' इव भौतिकमाध्यात्मिकं च द्वयमेव बहिरन्तर्जीवनं मानवजगतः समुद्भासितम् । यदालोकितः पन्थाः परमा-

र्थजीवने साक्षात्परात्परमुपतिष्ठते, भौतिकजीवने सार्वभौममहिंसकं रामराज्यं च। किञ्च—अस्याः प्रथममन्त्रेऽपि चरणत्रयाऽपेक्षयाऽस्ति निःसीमो महिमा **'ईशावास्यमिदं सर्वम्'** इति प्रथमचरणस्यैव। यत **'ईशावास्यमिदं सर्वम्'** इति सार्वभौमदिव्यसन्देशस्य 'जडचेतनमयानां विश्वब्रम्हाण्डानाम् प्रतिकणं प्रत्यंशं चेश्वरो व्याप्य स्थितोऽस्ति। स एव खल्वेकः सर्वेषां स्वामी। नह्यत्र कस्मिंश्चिदपि वस्तुनि कस्यचित्स्वामित्वं नाम। मायापारवश्यात्स्वस्वकर्मणां परिणतिचक्रेषु जीवा बम्भ्रम्यन्ते। शाश्वती शान्तिर्मुक्तिर्वा ज्ञानोदितस्य, भक्तिपरिष्कृतस्य च कर्मयोगस्यैव हि विषयः। ईश्वरपरायणतामन्तरेण नाऽन्याऽन्तिमा गतिर्मानवस्य— 'नाऽन्यः पन्था विद्यतेऽयनाय!' इत्येवं विश्लेषणे गाढं विश्वस्तानामेव हि कृते **'तेन त्यक्तेन भुञ्जीथाः, मा गृधः कस्यस्विद्धनम्'** इति द्वे विधिवाक्ये भजतः साफल्यम्। अत इमे द्वे सुवर्णविधिवाक्ये अध्यात्मनिर्माणायाऽऽत्मनोऽवैयर्थ्याय च तदेव प्रथमं चरणं महिमाऽतिशयमहितमुपजीवतः। ईश + आवास्यम्' एतदन्तरेवाऽस्ति समस्तानामाध्यात्मिकाऽऽस्तिकदर्शनानां बीजम्। गणपत्युपनिषच्छ्रीकृष्णोपनिषदित्यादिवदीशोपनिषदित्येवैतामसंज्ञायेशावास्यमिति संज्ञानेन सर्वत्र पराऽऽत्मसत्तामात्मभावं समदर्शनं चोद्‌बोधयति ऋषिर्व्यवहारे व्यक्तिस्तरे, राष्ट्रियस्तरे चाऽन्तःस्थमानवताम् राजनीतिकं सामाजिकं धार्मिकं च सहाऽस्तित्वम्। यदभावाद् वर्तमानं मानवजगदेवं नरकायते। अत ईशावास्यमित्यभिधानमेव सारगर्भमस्ति, यद्यपीशोपनिषदित्यपि नामान्तरं क्वचित् प्रचलति।

किञ्च – मानवचेतनायाः सर्वान्तसीमा सैषा 'ईशावास्योपनिषद्' भवाऽनलज्वालाकवलितानां, शान्तिकामिनां, मुमुक्षूणां समस्यायाः शल्यचिकित्सैवाऽस्ति। या त्रिकालदर्शिनां तत्वविदां प्राचीनमहर्षीणाम् क्रान्तदर्शितायाः प्रतीकमस्ति। यावत्प्रकृताया ऋषिचेतनाया आधारे मानवजगति शान्ताऽऽत्मानुशासनपूर्णा बौद्धिकी क्रान्तिर्नो भवेत्, तावद्विश्वं कात्मता न सेत्स्यति, नचाऽहिंसको मानवसमाजो निर्मितो भविष्यति। नच वैयक्तिकस्तरे कश्चिन्मानवो मुक्तिमार्गस्याऽधिकारं बिभरिष्यति च। किं बहुना— हन्त, तदेव नैतिकताया दारिद्र्यम्! तदेव च मानवताया दुर्भिक्षम्! मानवजगति तानि तानि वासनामूलानि विषमबन्धनानि, संग्रहशोषणादिकान्यनात्मवन्ति दुरितानि तत्फलानि च मिथःपीडनरोदनक्रन्दनानि यथावदेव बोभूयिष्यन्ते। असद्ग्रहादात्ममुक्तावयतमानस्य मूढधियो मानवसमाजस्य त्रिकालावच्छेदेनैवं दीना निष्प्रयोजना च स्थितिर्भवति, भविष्यति च— **अघायुरिन्द्रियारामो मोघं पार्थ स जीवति—** गीता। ... ... **प्रमाद्यन्तं वित्तमोहेन मूढम्। नायं लोको नाऽस्ति परः** ... ... —कठोपनिषद्:

ईशावास्येन संक्षिप्तैः शब्दैरेवमाख्यातम्— ईश्वरस्योदारराज्ये ह्यात्मविकासस्य पन्था एवमसीमितोऽस्ति— साधकः साक्षादीश्वरतामपि प्राप्तुं शक्नोति। नाऽस्त्यत्रोद्धारस्य, साम्राज्यस्य, दिव्यभोगस्य वा दीना प्रार्थना, प्रत्युत सत्वोत्साहवर्धकस्य सत्यस्याऽन्वेषणतो वैयक्तिकीम्, जातीयाम्, राष्ट्रियां तथाऽन्तरराष्ट्रियां च क्षुद्रसङ्कीर्णतां निरस्य विश्वसकल-मरुमरीचिका अवधीर्य, 'अहम्' तत्वस्याऽत्यन्तिकनिवृत्तिं संसाध्य, पञ्चकोशाऽतीतमहं-प्रत्ययाऽलम्बनमात्मानं साक्षात्कृत्य वासनाक्षयाऽपरनाम्नो मोक्षस्य वीर्यवदभियानमस्ति। परन्त्वेतदिष्टं नो सहजसाध्यम्, तत्कृते साधकस्यैवं निष्ठया भाव्यम्— 'साधकेन स्वस्मिन् सत्यशोधकेन कठोरेण तपस्विना, परेषु च सदोदारेण [अहिंसकेन] भाव्यम्। तस्य तीव्र-साधनायाः सर्वोन्नतेन लक्ष्येण भाव्यम्। नच तस्य महत्तायामपि गर्वलेशो विधेयः। सतो लक्ष्यस्य कृते सतैव साधनेन भाव्यम्। सर्वमपि कर्मजातमीश्वरार्पणधियाऽनासक्तभावेन च कर्तव्यम्। मिथ्याचारः सर्वथा हेयः। एवं कुर्वन्नन्ततो देहं, नाम, रूपं चाऽनन्तेऽसीमे च परिणमयंस्तदाकारो विराट्स्थितिं प्राप्नुहि'।

'क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति'— उपर्युक्तायां निष्ठायां यदि स्तोकोऽपि प्रमादो भवेत्, स एव मोहस्य हेतुर्भविष्यति। मोहादहङ्कारः, अहङ्काराद्बन्धः, बन्धाच्च क्लेशा इति संसारपारावारे मायापारवश्यान्निमज्जनोन्मज्जने नैव कदाचिद्विरंस्यतः। 'पुनरपि जननम्, पुनरपि मरणम्'!

'विश्वस्मिन्नुपनिषत्समानो जीवनस्योन्नायकोऽध्ययनीयविषयः कोऽपि नाऽस्ति'— इति जर्मन्याः प्रसिद्धविदुषा सोपेन्हरेण यदुक्तम्, तत् सर्वोऽपि सचेतनो मानवसमाजो भविष्यति निःसन्देहं संमंस्यते। अत उपनिषद्भावनायाः सर्वासु भाषासु, सर्वेषु क्षेत्रेषु प्रचारो विश्वमानवाऽभ्युदयनिःश्रेयससिद्धये भविष्यत्येव। तत्राऽपि सत्स्वपि बह्वीषु संस्कृतव्याख्यासु पुनरेतस्याः संस्कृतेऽनुवादेऽस्ति कारणमेतत्— 'यतो विनोबा महोदयानां विषयप्रतिपादनशैल्यामन्यैवाऽकर्षिका मौलिकताऽस्ति, नवनवाः सारगर्भा उपपत्तयश्च। अतो हृदयगस्यायाः सर्वहितार्थाया अस्या व्याख्याया अपि संङग्रहसौभाग्यमस्त्वनन्यसंग्रहसंपन्नस्य संस्कृतभाण्डागारस्य तथा संस्कृतस्य लौहनिधित्वादस्या अनुपमव्याख्यायाश्चिरं सुरक्षा चेति।'

परम् ममैव हीनदुर्बला शैली, शब्दविन्यासो ज्ञानं च तथोपनिषदृषिवत्क्रान्तदर्शिनां विस्मृतप्रायप्रपञ्चानां, साक्षाद्विद्यावतारभूतानां, तत्र विश्वप्रसिद्धमहात्मनां विनोबा महोदयानां तास्ता भावनाऽभिव्यक्तीः कथङ्कारं स्पष्टयेयुः, तद्विषयेऽस्म्यहमनेकान्ततः क्षमा-

प्रार्थी । यतस्तेषामेव शिक्षातो यज्ञियभावनया विहितः सोऽयं मे लघीयान् प्रयासः श्रद्धाया विश्वासस्यैव च प्रेरणायाः फलमस्ति, न तु मेऽगणनीयस्य वैदुष्यलेशस्य ।

किञ्च–विद्वद्वराय तत्रभवते श्रीकुन्दरदीवाणमहोदयाय च परोलक्षान् धन्यवादान् समर्पयामि, य एतां वृत्तिं हिन्दीभाषायामनूद्य मह्यं सन्तोषमयस्याऽध्ययनस्य, संस्कृतानुवादस्य चाऽवसरं प्रत्तवान् । अतोऽस्म्यहमृणी तस्य ।

अन्ते च — एतत्पुस्तिकाप्रकाशनसंबन्धि मूललेखकमन्तव्यं लेखनयन्त्र–मुद्रितरूपे संप्रेष्य (यदेतदग्रतो यथावत्प्रकाशितमस्ति) माम् सातिशयमनुगृह्णते (नेपालकाष्ठमण्डपस्थिताय) भारतीयराजदूतावासाय चाऽहं शतशो धन्यवादान् समर्पयामि । जयतु संस्कृतम् !

विनीतः

पूर्णप्रसादः 'ब्राह्मणः'

भारतीय राजदूतावास, नेपाल
EMBASSY OF INDIA
NEPAL

१२ नवम्बर १९६८

प्रिय पूर्णप्रसादजी ,

नमस्कार । ईशावास्यवृत्ति के संस्कृत अनुवाद के संबंध में आचार्य विनोबा भावे ने सूचित किया है कि अनेक कार्यवश तथा आंखों की कमजोरी के कारण वह आपका अनुवाद देखने में असमर्थ हैं । इसलिये वह भूमिका भी नहीं लिख सकेंगे । क्योंकि जबतक किसी पुस्तक का अध्ययन वह स्वयं नहीं कर लेते भूमिका लिखने में भी उन्हें संकोच रहता है । फिर भी उन्होंने यह इच्छा व्यक्त की है कि क्योंकि आप संस्कृत के विद्वान हैं यदि आप स्वयं पुस्तक का प्रकाशन करें तो उसमें उन्हें कोई आपत्ति नहीं होगी ।

आशा है परिस्थिति से अवगत होकर आप स्वयं प्रकाशन की कोई व्यवस्था करने का प्रयत्न करेंगे ।

शुभकामनाओं सहित,

आपका,

(डा० इन्दुशेखर)
सांस्कृतिक सहचारी

श्री पूर्ण प्रसाद ब्राह्मण,

प्रस्तावना

'ईशावास्यम्' प्रकृत्य किञ्चिल्लेखितुमासीन्मे चिरन्तनो विचारः। यदाऽहं 'सासून' औषधालये श्रीमहात्मना गान्धिना मेलितुं गतः, तदा तेनैवं स्वमभिलषितं प्रकटितम्। मया च तत् स्वीकृतम्। परं तस्मिन् तीव्रकर्मयोगसमये तथा सर्वथा संलग्नता संभाव्या नाऽसीत्। कालेन त्रावङ्कोरहरिजनयात्रोत्तरं म. गान्धिना मह्यमेष आदेश एव दत्तो यत्—"यथा भवतः स्वात्मनः सन्तोषजननक्षमं स्यात्तथा यथासमयं लिखतु नाम, परं मत्सदृशोपयोगिन्येका टिप्पणी त्ववश्यं साम्प्रतमेव भवता लेख्या, कामं सा लघुतमैव भवतु!"। तदादेशानुसारमेकां लघ्वीं टिप्पणीं लिखित्वाऽहं तस्मै दत्तवानपि। दत्ताया अपि तस्या द्वादशकल्पानि वर्षाणि गतानि। वस्तुतः सा टिप्पणी प्रकाशनार्था नाऽसीत्। परं यदाऽहं कारायां पतितस्तदा बहिर्गतैर्मे मित्रैर्मुद्रयित्वा सा पुस्तिकाऽऽकारे प्रकाशिता। तत एका सा पुस्तिकाऽकस्मात् कारायामुपागता च। ततोऽहमतन्द्रोऽभवम्। मासद्वयं तमेव विषयं चिन्तयन्नेकं लघु भाष्यं चाऽलिखम् यदहमधुना 'वृत्ति' नाम्ना योजयन्नस्मि। सैव वृत्तिरन्तिमायाष्टिप्पण्याः संशोधितस्य, परिवर्धितस्य च संस्करणस्य रूपे संप्रति प्रकटीभूताऽस्ति।

यद्यपि पूर्वाचार्याणां विवरणतोऽस्मिन् (विवरणे) बहुत्र भिन्नता दृक्पथमायाति, तथात्वेऽपि नास्ति कश्चिदत्र विरोधाऽवसरः। नहि वचनमर्थभारं गणयति। तत्र पूर्वाचार्याणां परिश्रमस्य सार्थक्यमेव निर्दिश्यते, यदि तन्मूलो विचार उत्तरोत्तरं समेधमानो भवेत्। यदि नो भवेत्प्रतिपाद्यमन्यत् किमपि, तर्हि केयमावश्यकता पुनर्लेखनस्य!

ईशावास्योपनिषत् पूर्णोपनिषदस्ति। अर्थात् पारमार्थिकजीवनस्यैकं परिपूर्णं चित्रं तत्र संक्षिप्य चित्रितमस्ति। 'ईशावास्य' सन्दर्भोऽसौ वेदानां सारोऽस्ति, गीतायाश्च बीजम्। स्वल्पैरेवाऽक्षरैः सूचितमस्ति. यथा—'व्यूह' 'समूह' इति शब्दद्वय एव यत्र क्रमशो गीताया दशमैकादशाऽध्यायावन्तर्भावितौ स्तः। 'अकायम्' 'अव्रणम्' 'अस्नाविरम्' इत्येतावत्येव क्षेत्रक्षेत्रज्ञयोर्विवेकः सम्पूरितः। देहधारिणः पुरुषस्य कृते कर्मयोगादन्या गतिरेव नास्तीत्येतद् गीतायाः सारवद्विवेचनम् 'एवं त्वयि, नाऽन्यथेतोऽस्ति' इत्येतावत्स्वेव शब्देषु दृश्यताम्!। 'वायुरनिलम्' इत्येकस्मिन्मन्त्रेऽष्टमाऽध्यायप्रतिपादितायाः प्रयाणसाधनायाः सातत्ययोगस्य च द्वयोरेव शिक्षा प्रदत्ता। 'ततो न विजुगुप्सते' इत्यत्र गीताया भक्तलक्षणं द्रष्टुं शक्यते। 'तत्र को मोहः, कः शोकः!' इत्येतावतैव सोपक्रमोपसंहारा गीता समाप्तिं गता। 'वासुदेवः सर्वमिति'— इति प्रतिपादितो 'वासुदेवः' 'ईशावास्य' शब्द एवाऽन्तर्भूतः। "त्यक्तेन भुञ्जीथाः"

इत्येतत् सैव नवमाऽध्यायस्य राजविद्या, समर्पणयोगो वा। 'असुर्या नाम ते लोकाः' अस्मिन्मन्त्र आसुरसंपदो गतिः संक्षिप्य कथिता। 'योऽसौ पुरुषः सोऽहमस्मि' इत्येष पुरुषोत्तमयोगः। 'हिरण्मयपात्रम्' एवाऽस्ति योगमाया। चतुर्थपञ्चमयोर्मन्त्रयोस्तु ज्ञेयवर्णनम् स्पष्टत एवाऽयातम्। गीतयाऽऽत्मौपम्यसाम्ययोगावीशावास्यसन्दर्भस्य षष्ठसप्तमाभ्यां मन्त्राभ्यां यथायथं गृहीतौ। सप्तदशाऽध्यायवर्ती 'ॐतत्सत्' मन्त्रः 'सत्' स्थाने 'सत्य'– शब्देन भिन्नाकारस्त्रिषु स्थानेषु विभज्य प्रयुज्यते। 'कुर्वन्नेवेह कर्माणि' 'कुरु कर्मैव तस्मात् त्वम्' इत्युभयत्रैव साधनायाः स एवाऽग्रहो विलोक्यते। 'मामनुस्मर, युध्य चेति' भगवत आज्ञा भक्तभाषायाम् 'युयोध्यस्मज्जुहुराणमेनः' एवं परिवर्तिता भाति। नवममन्त्राच्चतुर्दशमन्त्रं यावत् प्रतिपादितं बुद्धिशोधनम् हृदयशोधनं च पर्यायेण सांख्यबुद्धेर्योगबुद्धेश्च शोधने इति ज्ञायेते। यदि वयं साधु निरूपयेम — दुष्टतानियमनं, साधुत्वत्रेरणं चैतदवतारकार्यद्वयं 'यम' 'सूर्य'— इति विशेषणद्वये द्रष्टुं शक्यते। अहं त्वस्यैव गीता–विक्षिप्तः, येन संभवेदीदृशं मम दर्शनम्! परन्तु विहायाऽपि विस्तरम् निःसन्दिग्धमेवैतद्, यत्— 'गीताया बीजमीशावास्येऽस्तीति'।

अन्ते मन्त्राः, तत्पदपाठः, हिन्दीगद्यानुवादश्च दत्ताः सन्ति। अनुवादोऽस्ति प्रातःप्रार्थनायां प्रवचनार्हः। अत्र 'परंधाम' प्रदेशे (स्थिताः) वयं एवमेव प्रवच्मः। साधकस्य समग्राऽपि साधना तत्र संक्षेपेणाऽभिव्यक्ताऽस्ति। अतः प्रातःस्मरणार्थम् सः (अनुवादः) अतिमात्रमुपयुज्यते। यात्रोपक्रमात् पूर्वं मानचित्रदर्शनम् लाभजनकं भवति। सर्वत्रैतदुपक्रमणीयं चाऽस्ति।

परंधाम, पवनार
२२ जुलाइ १९४९

—विनोबा

विषयसूची

ईशावास्यबोधः

[स्व० महादेवदेसाएस्तृतीयपुण्यतिथौ, खादीविद्यालये, सेवाग्रामे, विनोबामहोदयप्रत्तं प्रवचनम्]

भ्रात्रा नारायणेन यदाऽहमीशावास्य'-पाठाय निमन्त्रितः, तदा मयाऽपि विनैव सङ्कोचं तत्स्वीकृतम् । यद्यपि एतर्हि मयि तादृशी पाठवृत्तिर्नास्ति, यथा पुराऽऽसीत् । तथाऽपि पाठे लाभोऽस्तीत्येतदहं स्वीकरोमि । पाठेन समं तदर्थज्ञानमप्यावश्यकं भवति । एतदपि मयाऽवसितम्, यत्—'न मयाऽत्र केवलोऽक्षरपाठः करणीयः, अपि तु तदर्थोऽपि व्याख्येयः'। अतोऽहं व्याख्यां प्रारभे—

एषा हि लघ्वी उपनिषदस्ति। नैवेदृशीतरा लघ्वी रचना संभवेत्, यत्रैतावानर्थः समावेशितः स्यात्। वयं प्रतिदिनं गीतायाः पाठं कुर्मः। साऽपि लघुरेवाऽस्ति। तथापि तस्यामष्टादशाध्यायाः सन्ति, परमस्यां (उपनिषदि) तु केवलमष्टादश श्लोकाः। लोकाः स्वीकुर्वन्ति—'जगति प्रथमो ग्रन्थो वेद इति'। यत्र वेदानां रहस्यमुपलभ्यते, ते ग्रन्थाः वेदान्तसंज्ञां दधति। 'ईशावास्य'- सन्दर्भोऽपि वेदान्तग्रन्थ एकः। तादृशा वेदान्तग्रन्थास्तु बहुशः सन्ति, परमत्र समासतो वेदानां सारः समाविष्टोऽस्ति, तस्याऽपि सारांशः प्रथमे मन्त्रे।

तस्याऽर्थो यथा— लोके यत्किञ्चिदपि जीवनमस्ति, तत्सर्वमीश्वरेण व्याप्तमस्ति। नास्ति किमपि वस्तु ईश्वरेण विनाभूतम्। सत्ताया भाषायां यदि वदेम—'अत्र केवलं तस्यैव सत्ताऽस्ति'। स एवैकः स्वाम्यस्ति। एतद्विदित्वाऽस्माभिः सर्वमपि तस्मा एव समर्पणीयम्, यच्च ततः प्राप्येत तदेव हि प्रसादबुद्ध्या ग्रहणीयम्। अत एवं भावनीयम्—'नाऽस्त्यत्र मम किमपि, अपि तु सर्वमेवास्तीश्वरस्येति'। यः पुरुष एवं भावयेत, अर्थात् किमपि वस्तु नो स्वं मन्येत, तर्हि सर्वं तस्यैव भविष्यति, सर्वमेव स प्राप्स्यति च। यत्किमपि स प्राप्नुयात्, तत एव स सन्तुष्टो भविष्यति। न स कस्मिंश्चिदपि मत्सरपरो भविष्यति। न स कस्यचिदपि धनमभिलषिष्यति। एवमनेन लघुमन्त्रेणैको महान् जीवनव्यापी सिद्धान्त आख्यातोऽस्ति, तस्य कार्यान्वयनाय तथोपायश्च। ईश्वरे समर्पणम्, तत्प्रसादरूपेण ग्रहणम्, अमात्सर्यम्, वित्तैषणाराहित्यम् चैवं संपूर्णो विचारोऽस्मिन् मन्त्रेऽस्मत्समक्षमुपस्थापितोऽस्ति।

प्रायो वयं पश्यामः — 'मनुष्योऽन्यदीयं स्वमभिलषति। तत्राऽयं हेतुरस्ति, यत्— 'स आलस्येनैव जीवितुं (देहयात्रां कर्तुम्) समीहते। अत एव द्वितीये मन्त्रे कथितम् — विना कर्मणा जिजीविषा तु सत्यं जिह्मव्यवहारो भवति (स्वस्यैव) जीवनेन। अर्थात् निरन्तरं कर्म कुर्वाणः — यादृशं जीवनं भगवान् देयात्— जीवेत्। यदा वयं कर्म त्यजामः, जीवनं भाररूपं भवति, शापरूपं च। ज्ञात्वाऽज्ञात्वा वा वयमेवैतत् कुर्वन्तः स्मः, यतो दुःखञ्च भुञ्जानाः स्मः। यानि च जगति सन्ति पापानि, तान्यत एव प्रायः समुत्पन्नानि।

पुरतस्तृतीये मन्त्रे उक्तम्— 'भ्रातर्यदि भगवन्तं विस्मरेः, भोगप्रधानां वृत्तिं श्रयेथाः, कर्मनिष्ठां विहायाऽलस्यं चाऽङ्गीकुर्याः, तर्हि जीवन इहैव नरके निपतेः। या च स्थिति- र्जीवने भवति, तथैव गतिर्मरणोत्तरमपि भविष्यतीत्येवं तात्पर्यं तृतीयमन्त्रेण बोधितम्।

चतुर्थपञ्चममन्त्रयोरेकः स्वतन्त्रः परिच्छेदो भवति। तस्याऽयमस्ति निष्कर्षः— 'ईश्वरस्याऽस्ति शक्तिरलौकिकी, निःसीमा च। नहि तद्विषये वयं तर्कयितुं पारयामः। अस्मत्तर्केण स सीमितो भवेत्।' गीतायामुक्तमेतत्— 'यदेश्वरोऽवतरति, तदा स महत् कर्म कुर्वाणो दृश्यते। परं तेन कर्मणा नैष लिप्तो भवति। तदाऽप्यकर्मैव स भवति। तद्विपरीतं यदा स स्वप्रकृतौ भवति, अर्थात् अवतारग्रहणं न करोति, तदा स किमप्यकुर्वाणो दृश्यते। परं तदाऽपि स सर्वस्य जगतः शासनं कुर्वन् भवति। अर्थात्— अकर्माऽपि स सर्वं कर्म कुर्वन्नेव भवति। तदेव व्यापकं तत्स्वरूपमत्र चित्रितम्।

पुनस्त्रिषु मन्त्रेषु वर्णनमस्तीश्वरभक्तस्य। स (भक्तः) आत्मनि सर्वम्, सर्वेषु चाऽत्मानं पश्यति। एषैव भक्तिर्नाम। भक्त्या स्वपरयोर्भेदो नश्यति। मनुष्येण स्वस्याऽन्तराले परःसहस्रा भित्तयः (अवरोधाः) प्रतिष्ठापिताः सन्ति। एतन्मूला एव वैरसङ्घर्षा राष्ट्रे, समाजे, कुटुम्बे च समुत्पन्नाः। अस्याः स्वपरबुद्धेर्निरसनमेव हि ईश्वरज्ञानस्य फलम्। य ईश्वरे भक्तिमानस्ति, सोऽस्मिन्नेव मार्गेऽग्रसरो भवति। प्रतिदिनं तस्याऽत्मभावना समेधते। अर्थात् स विचारयति— 'मम शरीरे यथा वासनाः सन्ति, तथाऽन्येषामपि। अतो मया तान् भोजयित्वा भोज्यम्, पाययित्वा पेयम्। मयि, मत्कुटुम्बे च नास्ति कश्चिद् भेदः। एवं ग्रामे-ग्रामे, राष्ट्रे-राष्ट्रेऽपि नाऽस्ति भेदः। नैतावन्मात्रम्, मनुष्ये पशौ च न स भिन्नतामङ्गीकरोति। एवं स स्वपरभेदं निराकरोति। य एवं वर्तते, तस्य जीवनमानन्दमयं भवति। एवमीश्वरनिष्ठमथवाऽऽत्मज्ञानिनं पुरुषं निर्वर्ण्याऽष्टममन्त्रान्ते पूर्वार्धं समापितम्।

अग्रतस्त्रिषु मन्त्रेषु बुद्धेः कार्यमाख्यातमस्ति। भगवताऽस्माकं हस्ते बुद्धिरूपं महदस्त्रं प्रदत्तमस्ति। अस्माद्वयं स्वां महतीमुन्नतिं कर्तुं पारयामोऽवनतिं च। अस्मा-

भिरुन्नतिः कार्या । जगति यानि ज्ञानानि सन्ति, अस्माकं न तैः सर्वैः प्रयोजनम् । किञ्चित्त्वावश्यकमेव ज्ञानमस्ति, किञ्चित्त्वनावश्यकमपि । आवश्यकानावश्यकज्ञानविवेकोऽस्माकं शिक्षणीयः । यद्धि ज्ञानमनावश्यकम्, तेन जीवनं नष्टभ्रष्टं भवति । तद्धि बुद्धौ व्यर्थं भारायते च । यत्त्वावश्यकं ज्ञानमस्ति, तद्यदि न गृह्येत ! मनुष्यः स्वं कर्तव्यं पालयितुं न शक्नुयात् । अत एतेषु मन्त्रेषु कथितम् — विद्याया आवश्यकताऽस्ति, अविद्यायाश्च । यद् ज्ञानमनावश्यकम्, तस्याऽज्ञानमेव भवतु । यदि भ्रमादनावश्यकं ज्ञानं जातम्, तद्यत्नतो विस्मर्तव्यमेव । एतत्प्रसङ्गेऽस्माकमेतदपि विवेक्तव्यमस्ति — " वयं तु ज्ञानाज्ञानाभ्यां द्वाभ्यामेव भिन्नाः, केवलं तयोः साक्षिरूपाः स्म " इति । एवमभ्यासाद् बुद्धिरीश्वरपरायणा भवति, अन्यथाऽवनतेः कारणं च ।

अग्रतस्त्रयो मन्त्राः हृदयशोधनविषयकाः सन्ति । यथा बुद्धेः शुद्धिर्वाञ्छनीयाऽस्ति, तथा हृदयस्य शुद्धिरपि । अस्माभिर्हृदये द्रष्टव्यम् । अस्मद्धृदयम् दोषैर्गुणैश्च पूर्णमस्ति । तदस्माभिः किं कर्तव्यम् ? — 'अस्माभिर्गुणानां संभूतिः (उत्तरोत्तरमुत्पत्तिः) कर्तव्या । तेषां विकासः सततं कर्तव्यः, उज्ज्वलीकरणं च । तथैव दोषाणाम् असंभूतिश्च कर्तव्या । अर्थाद् दोषाणां नवोत्पत्तिरवरोद्धव्या । ये च वर्तमानाः स्युस्ते च निराकर्तव्याः । यत्किञ्चिदपि वयं कुर्याम, तत्राऽस्माकं दृष्ट्या चित्तशुद्धिपरया भवितव्यमेव । बाह्यदृष्ट्या किमपि कर्म सातिशयं सफलमपि कामं भवतु, लोकाश्चाऽस्मज्जयजयकारपराः कामं भवन्तु, तथात्वेऽपि तत्कर्म यद्यस्मद्गुणवर्धनक्षमं नो भवेत्, तर्हि तज्जघन्यमेव मन्यते । ततोऽस्माभिर्न केवलं स्वस्यैवाऽवनतिः कृता भवति, अपि तु सर्वस्याऽपि लोकस्य । अस्माकमेवमपि विवेक्तव्यमस्ति— 'वयं हि दोषतो गुणतश्च द्वाभ्यामेव भिन्नाः, केवलं तयोः साक्षिरूपाः स्मः ' इति । एवमभ्यासेन हृदयशुद्धिः सम्यग् भविष्यति ।

अतोऽग्र एको महान् मन्त्र आम्नायते । तस्मिन्नेवं दर्शनस्य सारोऽन्तर्निहितोऽस्ति— 'जगति सत्यमन्तर्भूतमस्ति । तन्मोहेनाऽवृतमस्ति । यावत्तन्मोहावरणं वयं न भिन्द्मस्तावत्सत्यदर्शनं नो संभवति । अत्र न बुद्धिशक्तेर्मन्दता कारणत्वेनाऽवगन्तव्या । दर्शनं तु बुद्धौ मोहावरणादेव हेतोर्न भवति । एकोऽस्ति मोहः— काञ्चनमोहः । बहिरभ्यन्तरे चाऽस्मादेव मोहादावरणान्युत्पद्यन्ते । तैरेव सत्यदर्शनं न संभवति । अन्ये च विविधाः सन्ति मोहाः । ते 'हिरण्मयपात्रम्' अर्थात् 'स्वर्णस्य पिधानम्' इति संज्ञायन्ते । यदि सत्यदर्शनं करणीयमस्ति, तर्हि स्वर्णस्य पिधानं दूरतोऽपसारणीयं भवति ।

अन्तिमेषु त्रिषु मन्त्रेष्वस्माकं विकासक्रम उदीरितोऽस्ति । षोडशे मन्त्रे कथितमस्ति— 'यमीश्वरं कथयन्ति, स इमं संसारं प्रेरयति, पालयति, पुष्णाति, नियच्छति च । स संसारं नित्यं निरीक्षते । यस्येदृशी शक्तिर्गीयते, तत्समक्षेऽहं त्वेकोऽस्मि तुच्छजीवः । तस्मिन्मयि च नास्ति (वस्तुतः) तत्त्वभेदः । यतोऽहमस्मि तस्यैवांशः । स एवाऽहमस्मि !

मध्यस्त्ययं देह एकमावरणम् । अयमस्त्येकं सुवर्णपात्रम् । एतदभ्यन्तरेऽहं निलीनोऽस्मि । यदि वयं देहमिमं भेत्तुं शक्नुमः, तर्हि 'अहम्' इत्यस्य दर्शनं भवेत् । ईश्वरो यथाऽस्ति पूर्णः सुन्दरश्च तथाऽहमप्यस्मि, भवितुं च शक्नोमि । 'सोऽहम्'— मन्त्रेणैतदाश्वासनमस्मभ्यं प्रत्तम् ।

पुनः कथितमस्ति— 'एतत्कृतेऽस्माभिरामरणं साधना कर्तव्या । यावन्तो हि भेदाः सन्ति, ते सर्वे बाहीकाः, देहसम्बद्धाश्च सन्ति । मयि, आत्मनि च नाऽस्ति कश्चिद् भेदः । बाहीकमावरणं भित्त्वाऽन्तर्यामिनो निकटे नः प्राप्तव्यमस्ति । कृष्णगौरयोः, कृशस्थूलयोः, मूढचतुरयोः, नीतिमदनीतिमतोश्च भेद औपचारिको देहपर्यवसायी च भवति । अयं तु विस्मर्तव्य एव, यतोऽस्माकं तु ग्रहणीयमस्ति किमप्यन्तर्वर्ति वस्तु । ऋषिः कथयति— 'य एवमामरणं साधनां करोति, तस्य देहान्ते सति मृन्मृदा सह मिलति, आत्मा च परमात्मना सह ।

अन्तिमो मन्त्रोऽस्ति भगवत्प्रार्थनापरः । मार्गदर्शकस्याऽग्नेः रूपे भगवान् दृष्टोऽस्ति । योऽग्निरभ्यन्तरे स्थितोऽस्मान् सजीवनान् करोति, यस्याऽभावे शरीरमनुष्णं (निर्जीवम्) भवति । योऽस्त्युष्णभावः, सोऽस्त्युपासनार्थक एकश्चैतन्यसङ्केतः । ततो वयं चैतन्यं परिचिनुमः । न सा चैतन्यस्य व्याख्या । अग्निस्वरूपश्चैतन्यदायी भगवान् प्रार्थितोऽस्ति— "प्रभो, यावदस्मासु चैतन्यमस्ति, उष्णताऽस्ति तावदस्मानृजुमार्गे स्थापय, नय माऽस्मान् कुटिलेन मार्गेण ।" यूयं व्यूतिकार्यं कुरुथः । संभवेत्तन्तुवायः स्यादस्य मन्त्रस्य ऋषिरपि । यूयं जानीथ, यत्— 'व्यूतिसमये यदि वेम्न आघातो वक्रो भवेत्, तर्हि वस्त्रमपि वक्रं विकृतं च भवति । अतोऽन्तिमेन मन्त्रेण भगवानेवं प्रार्थितोऽस्ति— 'प्रभो, (एवं कुरु-) अस्माकं जीवने यथाकथमपि वक्रता नोपेयात्, ऋजुमार्गेणैवाऽस्मान् नय ।" गुणानां मध्यतः कं नाम राजानं वृणुषे ?— इत्यहं यदि पृच्छ्येयम्, अहं निर्वाचनपद्धत्यैव कार्यं निष्पादयितुं वाञ्छामि, न तु कञ्चिद् गुणं स्थायिराजत्वेन वरितुम् । विभिन्ना गुणा एकैकमवधिं यावत् राजानो भविष्यन्ति । परं यान्गुणानहं राजत्वेन वृणुयाम्, तेषु ऋजुतायाः स्थानं प्रथममपेक्षिष्यते । यत्र ऋजुताऽस्ति, सरलताऽस्ति, तत्र धर्मोऽस्ति, जीवनं च । यत्राऽनृजुताऽस्ति तत्राऽधर्मोऽस्ति, मृत्युश्च । तन्तुकारो जानात्येव तत्, यत्— 'तर्कुणा ऋजुना भाव्यम् । न तत्र स्वल्पाऽपि वक्रता युज्यते । यथा तर्कुर्वक्रतां न सहते, तथा वयमपि स्वजीवने नैकान्ततो वक्रतां सहामहे । कायेन, मनसा, वाचा च बहिरन्तश्च वयं सरला भवाम । एवं सरलजीवनाय (भगवान्) अस्मान् सबलयेत्'— एवमस्मिन् मन्त्रे प्रार्थना विहिताऽस्ति ।

उपनिषद आरम्भे, समाप्तौ च यं शान्तिमन्त्रं पठन्ति, तस्यार्थोऽस्ति— 'सर्वं पूर्णमस्ति । अतः सर्वदा शान्तिराश्रयणीया । अशान्तेः किमपि कारणमेव नास्ति ।

परमस्माकं कृते एवमाभासो भवति— यद्यत् विलोक्यते तत्तद् दुःखमयं विलोक्यते, सर्वमपूर्णं च, यदस्माभिः पूरयितव्यमस्ति। परं तन्नतादृशम् ! कुम्भकारो मृदा घटं निर्मिमीते। परमार्थतस्तस्यैतद् ज्ञातव्यं भवति — 'नाऽहं किञ्चिद्रचयामि। घटस्तु मृत्तिकायामादित एव वर्तमानः केवलमव्यक्त आसीत्। अहं तु केवलं मध्ये निमित्तरूप उपस्थितोऽस्मि। एवं शिक्षकोऽपि विचारयिष्यति —'छात्रेभ्यो न स ज्ञानं ददाति।' ज्ञानं तु छात्रमस्तिष्क आदितो वर्तमानमेवाऽस्ति। शिक्षकस्तु केवलं तज्ज्ञानाविष्काराय सहायको भवति। एवं पितरावपि विचारयताम्। लोकोऽयं पूर्णोऽस्ति। परं मध्ये खेलावसरो मिलितोऽस्त्यस्माकम्। जले तरङ्गा उत्पद्यन्ते। एकस्तरङ्ग उत्पद्यते, विलीयते च। तदुत्तरं द्वितीयस्तरङ्ग उत्पद्यते, सोऽपि पुनर्विलीयते। परं तत्सर्वं भवति पानीयमेव। तथैव वयमपि। यदा वयं कार्यं कुर्मः, पतामश्च, तदाऽन्य उत्तिष्ठन्ति।' एवं यदा वयं विचारयामः, अशान्तेर्न किमपि कारणं स्थास्यति। अतोऽन्ते कथितम्— 'ॐ शान्तिः शान्तिः शान्तिः।'

ईशावास्यवृत्तिः

उपोद्घातः

(१) ईशस्मरणपूर्वकमीशावास्योपनिषदो यथाश्रुति यथामति च लध्वीं वृत्तिं लिखामि । आशासे— सा श्रुतिहृदयस्योद्घाटयित्री भविष्यति । सा जीवने सात्म्यीभवतु, देहबुद्धिः प्रणश्यतु ।

(२) सर्वप्रथममुपनिषच्छब्दस्यार्थं विचारयाम — 'उप' 'नि'— इत्युपसर्गाभ्यां, 'सद्' धातुना चैष शब्दो निष्पद्यते । उपनिषद्भिरेव स्वयमस्य व्याख्यैवं सूचिताऽस्ति— 'यदा वै बली भवति, अथ उत्थाता भवति, उत्तिष्ठन् परिचरिता भवति, परिचरन् उपसत्ता भवति, उपसीदन् द्रष्टा भवति, श्रोता भवति, मन्ता भवति, बोद्धा भवति, कर्ता भवति, विज्ञाता भवति' (छां० ७।८।१) यदा मनुष्यो बलवान् भवति, ततोऽसावुत्तिष्ठति, उत्थितः स गुरुसेवापरो भवति, ततः स गुरोः समीपे (उप) गत्वा वसति (सद्) । उपनिषीदन् स गुरोर्जीवनं सध्यानं पश्यति, तस्य व्याख्यानं श्रृणोति, तस्य मननं करोति, अवबुध्यते, तदनुसृत्याऽऽचरति, ततः परिणामे विज्ञानम् (अर्थात् अपरोक्षानुभूतिः) उपलब्धं भवति । सैव ह्युपनिषद् । 'नि' (अर्थात् 'नितराम्' 'निष्ठया') इत्ययमुपसर्गोऽत्र व्याख्यायां विनाभूत इव दृश्यते । परं सेवायां निष्ठा स्वतः संभवत्येव ।

(३) किन्तूपनिषदोऽन्यत्र स्थले व्याख्यैकाऽऽयाति— यत्र 'नि' इत्युपसर्गस्यैव एव सूचितोऽर्थः स्पष्टीकृतोऽस्ति, 'सद्' धातोस्त्वन्य एवाऽर्थोऽङ्गीकृतोऽस्ति— "ब्रह्मचारी आचार्यकुलवासी, अत्यन्तम् आत्मानम् आचार्यकुले अवसादयन्" (छां० २।२३।१) । "सब्रह्मचर्यं गुरुसमीपे वसन्, (उप) गुरुशुश्रूषायामात्मानमत्यन्तम् अर्थाद् विशेषरूपेण (नि) प्रत्यर्पयन् (सद्) यो रहस्यभूतां विद्यामधिगच्छति, सा विद्योपनिषद्" इति ।

(४) द्वयोरपि पर्याययोरेकत्र कृतयोरेवमर्थो निष्पन्नो भविष्यति — (१) आत्मबलम् (२) उत्थानम् (३) ब्रह्मचर्यम् (४) गुरुसेवायां निःशेषेण स्वशरीरार्पणम् (५) गुरु-(हृदय) सान्निध्यम् (६) जीवननिरीक्षणम् (७) श्रवणम् (८) मननम् (९) अवबोधनम् (१०) आचरणम् (११) अनुभूतिश्चेत्येतावन्तो भावा अस्मिन् लघौ शब्देऽन्तर्भूताः सन्ति। एवमुपनिषच्छब्दतः समग्रा ज्ञानसाधना, तत्फलं ज्ञानं चैतद्द्वयमेव सूचितं भवति। 'अमानित्वम्' 'अदम्भित्वम्' आचार्योपासनम् इत्यादेः प्राथमिकसद्गुणग्रामादारभ्य 'अध्यात्मज्ञाननित्यत्वम् तत्त्वज्ञानार्थदर्शनम्' इत्येतदन्तानि सर्वाणि साध्यसाधनानि गीतया 'ज्ञान' शब्दे यथाऽन्तर्भावितानि तथैव व्यापकमर्थं बिभर्ति ह्येव उपनिषच्छब्दोऽपि। उपनिषदो विषयविवेचनस्य विस्तारोऽस्या व्यापकव्याख्याया अनुरूप एवाऽस्ति।

(५) वेदान्त इत्यप्युपनिषदामेका संज्ञाऽस्ति। सैषा संज्ञा 'ईशावास्ये'ऽक्षरशो विशेषार्थे च चरितार्था भवति। यतः 'ईशावास्यम्' अस्ति यजुर्वेदस्याऽन्तिमोऽध्याय एव। परन्तु 'वेदान्त' इति शब्देन 'वेदरहस्यम्' इत्यभिप्रेतं भवति। अस्मिन्नर्थे 'ईशावास्यम्' उपनिषदां शिरोमणिरुत्तमं वेदरहस्यं च भाति। तत् (आकारेण) यावल्लघु तावदेव (अर्थगरिम्णा) महत् अस्ति। ज्ञानदेवस्य भाषायाम् — " **आँगे साने परिणामे थोर, जैसे गुरुमुखीं चें अक्षर** "— कायेन लघु परिणामदृष्ट्या महत्, यथा गुरुमुखात्प्राप्तम् अक्षरम् (मन्त्रः)। 'ईशावास्य'स्य प्रारम्भोऽप्येवंप्रकारक एवाऽस्ति। मन्ये — कश्चन गुरुः कमपि शिष्यं रहस्यं बोधयन्निवाऽस्ति।

(६) वैदिकविवेचनपद्धतौ त्रिकात्, द्विकात्, एककाच्च विषयविभाजनकरी प्रवृत्तिर्भवति। तदनुसारमत्र प्रतिमन्त्रत्रयं पञ्च त्रिकाः, मन्त्रद्वयस्यैको द्विकः, एकमन्त्रस्यैक एककश्चेत्येवं सर्वयोगादष्टादशानां मन्त्राणां सप्त विभागाः कृताः सन्ति। प्रत्येकं हि मन्त्रा मन्त्रान्तरेण कयाऽपि विशिष्टाकाङ्क्षया संबद्धाः सन्ति। एवङ्कारं सर्वेष्वपि तेष्वीश्वरभक्तिरूप एक एवाऽखण्डितस्तन्तुश्चाऽनुस्यूतोऽस्ति।

(७) तत्त्वविचारस्य त्रैगुण्यम्, ध्यानयोगस्य त्रिमात्राः, तर्कस्य वाक्यत्रयीचेत्यादिभिः कारणैस्त्रिका अनुकूला भवन्ति। एकस्यैव विचारस्य परस्परविरोधि, अथवा परस्परसूचकम् वा गौणं मुख्यं चाऽङ्गम् दर्शयितुं द्विका उपयुक्ता भवन्ति। (कश्चित्) पूर्णं विचारं सूत्ररूपे स्थापयितुमेककश्चाऽनिवार्यो भवति। अत्रत्ये विषयविभाजनेऽपीदृश्येव व्यवस्था दृश्यते।

(८) कर्मकाण्डभाख्याति — 'मन्त्रस्य ऋषिम्, देवताम्, छन्दो वाऽज्ञात्वा केवलं मन्त्रं पठन् नरो गर्ते पतति।' वेदान्तस्यैवं नाऽस्ति कुतोऽपि भयम्। तथात्वेऽपि

तेषाम् (मन्त्रस्य देवतादीनाम्) ज्ञानमवश्यं भवत्युपयोगि। अत्र ऋषिर्नारायणो मन्यते अस्याऽयमर्थो भवति— 'नारायणस्वरूपः कश्चिदहन्तारहित ऋषिः, यस्य नामाऽपि ज्ञायते, अर्थात् यः स्वसंज्ञामेव लोपयितुं समर्थोऽभूत्। कैश्चिद् 'दध्यङ् आथर्वण' ऋषि राख्यातः। अस्य मधुविद्याया द्रष्टृत्वेन बृहदारण्यके वर्णनमायाति (बृ० २।५।१६।१७) ईशावास्यस्य सर्वोपनिषदां मधुरूपत्वेनैषा कल्पना युज्यत एव। 'त्यक्तेन **भुञ्जीथाः**' इत्येतस्य शिक्षकस्याऽतुलत्यागमूर्तेर्दधीचेर्मुखतः श्रवणेऽस्ति वैशिष्ट्या तिशयः। देवताऽस्ति परमात्मा। अनुष्टुप् त्रिष्टुप् च द्वे च्छन्दसी स्तः, परं मुक्तभावे त्रयोदश मन्त्रा अनुष्टुभि सन्ति। पञ्च मन्त्रास्त्रिष्टुप्छन्दस्काः सन्ति। तेष्वष्टम षोडशश्च मन्त्रौ प्रसारितत्रिष्टुप्छन्दस्कौ स्तः। अस्य निदर्शनं तस्य मन्त्रस्य व्याख्याने कृतमस्ति।

शान्तिमन्त्रः

ॐ पूर्णमदः पूर्णमिदम्
पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय
पूर्णमेवाऽवशिष्यते

ओँ शान्तिः शान्तिः शान्तिः

ॐ ॥ तत्पूर्णमस्ति। एतत्पूर्णमस्ति। पूर्णात्पूर्णं निष्पद्यते। पूर्णात्पूर्णे निष्कासितेऽपि पूर्णमेवाऽवशिष्टं भवति।

ओँ शान्तिः शान्तिः शान्तिः

(९) 'पूर्णस्य पूर्णम् आदाय' इति विचार आपाततो दृष्टो विचित्र इवाऽभाति। किन्तु गणितशास्त्रं तदेवाऽक्षरशः संमनुते। 'पूर्ण' शब्दस्य स्थाने गणितशास्त्रम् 'अनन्त' शब्दं प्रयुङ्क्ते, इयदेवाऽस्त्यन्तरम्।

(१०) विश्वेश्वरः पूर्णोऽस्ति। विश्वं पूर्णमस्ति। पूर्णात्पूर्णं प्रभवति। पूर्णमुत्पत्तेर्न वर्धते, न च प्रलयादपचीयते। एवं पूर्णस्य क्रीडा चलति। एवं दर्शने जातेऽशान्तेर्नो किमपि कारणं भवति। अतोऽसौ शान्तिमन्त्रोऽस्ति।

(११) पूर्णस्य लीलादर्शने जातेऽशान्तेः किमपि कारणं नावशिष्यते। किञ्च— विकासाय पूर्णोऽवसरो भवति। प्रत्युतैवं कथनीयम्— 'पूर्णात्पूर्णमुदच्यते' एतद्विकासस्यैव सूत्रमस्ति। विकासाय न किमपि नव्यं निर्मातव्यं भवति। अन्तर्भूतं सदेव हि तत् ततो बहिः (उद्) निष्कासयितव्यं भवति (अञ्च्)। एतदेव हि शिक्षणशास्त्रम्।

(१२) शान्तिमन्त्र उपनिषदामादावन्ते च पठनीयो भवति, तत्राऽदौ श्रद्धयाऽन्ते च समाधानरूपेण।

(१३) उपनिषत्सु ये शान्तिमन्त्राः सन्ति, त उपनिषद्बाहीका मन्यन्ते। एवमयं मन्त्रोऽपीशावास्यबहिर्भूत एव। किन्तु स बृहदारण्यके (५।५।१) समावेशादुपनिषदोंऽशभूतोऽस्ति।

(१४) शान्तिमन्त्राणामुद्देश्यमध्ययनानुकूलोयाश्चित्तवृत्तेर्निर्माणम्। अतस्तस्य ग्रन्थप्रतिपाद्येन विषयेण सह सम्बन्धोऽनावश्यक इति मन्यते (ब्र० सू० ३।३।२५)। किन्तु पुनरपि शान्तिमन्त्रेऽस्मिन् मन्ये— ईशावास्यसार एवोदीरितोऽस्ति। प्रारम्भस्य प्रथममन्त्र एव वयं तस्य दर्शनं प्राप्नुमः (दृश्यताम् पञ्चमो मन्त्रश्च)।

ॐ। ईशावास्यमिदं सर्वम्
यत्किञ्च जगत्यां जगत्
तेन त्यक्तेन भुञ्जीथाः
मा गृधः कस्यस्विद्धनम्॥

अर्थः— हरिः ॐ। जगति यत्किमपि जीवनमस्ति, तत्सर्वमीश्वरेण वासितमस्ति। अतस्तन्नाम्नि त्यागं (समर्पणम्) कृत्वा त्वं यथाप्राप्तेन वर्तस्व। कस्यचिदपि धने स्पृहां मा कुरु।

(१५) 'ईशः' वा 'ईश्वरः' अर्थात्— राज्यकर्ता, सत्ताधारी। ईश्वरस्य व्यापिका सत्ता चतुर्थपञ्चममन्त्रयोः संक्षिप्य व्याख्याता। किन्तु वयं कथयामः— 'नाऽस्माकं कृते कस्यचित्सत्तायाः, राज्यस्य वाऽऽवश्यकताऽस्ति!'। तस्योत्तरम्— ईश्वरस्य राज्यं न तथा राज्यं भवति, तत्केवलं प्राजापत्यं भवति (मन्त्रः १६)। 'किन्तु न तेनाऽप्यस्माकं प्रयोजनम्, अस्माकमेव हस्ते सत्तया भवितव्यम्'। युक्तमेतत्— एषाऽपि च सत्ता वस्तुतस्त्वदीयैवाऽस्ति!। त्वं यदि 'सोऽहं-सिद्धि' प्राप्नुयाः, तत् कार्यम् सम्पन्नम् (मन्त्रः १६)। परं कथङ्कारं तां प्राप्नुयाः?। ईश्वरीयां सत्तां स्वीकृत्यैव सा प्राप्तुं शक्यते। स्वस्य सङ्कल्पस्य तत्र विलयनेनैवैतत्संभविष्यति (मन्त्रः १७)।

(१६) ईश + आवास्यम् = ईशावास्यम्। एतदस्ति समस्तं पदम्। ईशावास्यमर्थादक्षरत ईश्वरस्याऽवासस्थानम्। सर्वं जीवनमीश्वरमयमस्ति। अर्थात्— यथेश्वरो मङ्गलोऽस्ति, तथा तदपि मङ्गलमस्ति। परमेके तत् (जीवनम्) मिथ्येति कथयन्ति। (परम्) कथमेतत् ते मिथ्येति कथयितुं शक्नुवन्ति? यतः— यदा सर्वमीश्वरमयमेवाऽस्ति, तदैकस्य 'ईश्वरः' इति नाम्न उच्चारणमन्वन्यनामोच्चारणाय तु नैव किञ्चिदवशिष्यते।

(१७) '**ईशावास्यम्**' इत्यस्य स्थाने '**ईशा वास्यम्**' इत्यप्येकः पाठोऽस्ति। तदनुसारं शङ्कराचार्य एवमस्याऽर्थमकरोत्— 'ईश्वरेणाऽर्थादीश्वरभावनया जगद् व्यापनीयम्'। अयमर्थोऽपि रोचकोऽस्ति। सांप्रतमीश्वरो जगता व्याप्तोऽस्ति (मन्त्रः ५)। मन्ये— तस्य प्रतिशोधनार्थेयं योजनाऽस्ति।

(१८) '**ईशावास्यमिदं सर्वम्**' इत्येतस्य समानार्थकम 'वासुदेवः सर्वम्' इति (गीता ७।१९)। 'वासुदेवः' अर्थात् सर्वत्र कृतवासो देवः— एवं निरुक्तिरस्ति।

(१९) '**ईशा वास्यमिदं सर्वम्**'— एतत् सर्वमीश्वरेण परिपूरितमस्ति। मन्ये— कश्चिदेवं प्रत्यक्षतो दृष्टमिव वर्णयन्नस्ति! [दृश्यताम् षोडशो मन्त्रः] सर्वेषु विशेषेषु (फिनामिनन) एकं सत्तासामान्यम् (नाउमिनन) अनुस्यूतं भवति। यथैतदस्ति, तथा शाब्दिकमथवा तार्किकं वर्णनं नैतत्। नो सत्तासामान्यतर्कात्कथंचिदपीश्वरसिद्धिः संभविष्यति।

(२०) 'जगत्' (अर्थात् मराठीभाषायाम् अक्षरशः 'जगणारें') जीवकः, जीवनवान्। जगति सर्वाणि वस्तूनि जीवनवन्ति सन्ति। क्वचिज्जीवनं तिरोहितमस्ति, क्वचिच्चाऽविर्भूतम्। सर्वमीश्वरेणोवितं, व्याप्तं, पूर्णञ्चाऽस्ति।

(२१) 'जगत्यां जगत्'— स्थूलसृष्टेर्गर्भ सूक्ष्ममेकं जगदन्तर्भूतमस्ति। तत्रेश्वरो विराजते। उपर्यावरणस्य मोहकत्वाद् ध्यानमन्तर्न क्रमते। आवरणं दूरमपसार्य द्रष्टव्यम् [मन्त्रः १५]

(२२) 'तेन त्यक्तेन भुञ्जीथाः' अस्य भावार्थ उपर्युक्त एव। अक्षरार्थ ईषत्कठिनोऽस्ति। एका रचना— तेन [तस्मात्] त्यक्तेन [त्यागेन] भुञ्जीथाः। द्वितीया रचना— 'त्यक्तेन' [परित्यक्तेन] तेन [जगता] भुञ्जीथाः। तृतीया रचना— 'सति' सप्तमीरीत्या 'सता' तृतीयां कृत्वा—तेन [जगता] त्यक्तेन [परित्यक्तेन] सता, भुञ्जीथाः। चतुर्थी रचना— तेन [ईशेन] त्यक्तेन [दत्तेन] भुञ्जीथाः। कृतास्वप्येतासु भिन्नासु रचनासु न किञ्चिदन्तरं भवति भावार्थे। प्रथमा रचना सर्वसरलाऽनुभूयते। परमन्यासां रचनानां स्वीकारेऽपि न काचिदापत्तिः। सर्वास्वप्येतासु रचनासु 'भुञ्जीथाः' इत्यस्याऽर्थे नाऽन्यथाभावः। यद्यपि तमप्यन्यथयित्वाऽर्थः कर्तुं शक्यते, परं स गौणोऽनावश्यकश्च प्रतीयते।

(२३) ईश्वरस्य सत्तायां स्वीकृतायां मनुष्याणां स्वामित्वं स्वतो दूरीभवति। एतदेव 'तेन त्यक्तेन भुञ्जीथाः' इत्यनेन वाक्येन विशदीकृतम्। एतदेव हि गीताया नवमाऽध्यायस्य राजविद्या। त्यागस्याज्यं विधिः, न भोगस्य। वस्तुतस्त्यागभोगयोर्भेदमेव निरस्यन्त्यस्ति सैषा युक्तिः।

(२४) यद्येवमीश्वरीयसत्तां विज्ञाय त्यागवृत्तिः स्वीक्रियेत, तर्ह्यन्येषां भोगवृत्ति प्रतीर्ष्यायाः कारणमेव नाऽवशिष्यते। एतदेवाऽख्यातम् 'मा गृधः कस्यस्विद्धनम्' इत्यनेन वाक्येन।

(२५) वैदिकसाहित्ये सामान्यतया 'गृध्' धातोरकर्मकत्वात्, 'किम्' शब्देन सह प्रश्नार्थकस्य 'स्वित्' शब्दस्य प्रयोगाच्चाऽत्र 'मा गृधः' 'कस्यस्विद्धनम्' इति द्वयोर्वाक्ययोः संभवो जातः। यद्येवं स्वीक्रियेत, तर्ह्यर्थोऽप्येवं भविष्यति— 'तृष्णां मा कुरु' (यतः) कस्य नु धनम् ?

(२६) 'गृधः' इति 'गृध्' धातो रूपम्। आङ्ग्लभाषायाः 'ग्रीड' शब्दः अस्मात् (धातोः) एव निष्पन्नः। 'गृध' धातोः 'गृध्र' शब्दो निष्पद्यते। वेदा अन्यधनाऽपहारिणीं वृत्तिं 'गृध्रवृत्तिः' इत्यन्वर्थनाम्ना योजयन्ति।

(२७) अस्मिन्मन्त्रे वैदिकधर्मस्य सर्वोऽपि सारः सञ्चितोऽस्ति। [१] ईश्वरीयसत्तायाः स्वीकारः। अतः [२] स्वयं त्यागवृत्त्या जीवनयापनम्। अस्याः कृते [३] अन्येषां भोगवृत्तावनीर्ष्यालुता चेत्ययमेव हि प्रकारत्रययुक्तो वैदिको धर्मः। स्वात्मनः, परात्मनः, परमात्मनश्च सम्बन्धे कर्तव्यस्याऽत्राऽस्ति समाधानम्।

कुर्वन्नेवेह कर्माणि
जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति
न कर्म लिप्यते नरे ॥

अर्थः– इह लोके कर्म कुर्वन्नेव शतं वर्षाणि जीवितुं कामयस्व । देहवतस्तवाऽयमेव मार्गोऽस्ति । अस्माद्भिन्नो नास्ति मार्गः । मनुष्येण सह फलवासनैव (नैरन्तर्येण) आसज्यते, न तु कर्म ।

(२८) परधनाऽकाङ्क्षायाः अर्थात् परस्य धनमपि 'स्वस्ये' तिप्रकाराया श्रम-विरोधिन्या वृत्या विरोधिनः कर्मनिष्ठाविधेः स्वतः प्राप्तिरस्य मन्त्रस्य प्रयोजनम् ।

(२९) 'कुर्वन्नेव जिजीविषेत्' । मन्ये — 'कर्मयोगतो दूरीभवतो जनस्य जीवनाधिकार एव न भवति'— इत्येवं श्रुतिः सूचयति । कर्मयोग एव हि जीवनम्, अकर्मण्यतैव च मरणम् ।

(३०) इह । अर्थादस्मिल्लोके पारमार्थिकदृष्टेरप्यैहिकजीवनस्य (अपेक्षाकृतम्) मूल्यमस्ति । यत ऐहिकम् जीवनं पारमार्थिकजीवनस्य निकषायते । यस्यैहिकमेव जीवनं नास्ति पावनम्, कः प्रश्नस्तस्य पारमार्थिकजीवनस्य ! — इत्येतस्यैव हि विवरणमस्त्युत्तरमन्त्रे ।

(३१) 'जिजीविषेत्' । अत्राऽस्ति क्रियानिष्ठाया एव विधिः, न तु जिजीविषायाः । सैव (क्रियानिष्ठा) खलु जिजीविषाया औषधम् । जिजीविषा यथा मयि, तथाऽन्येष्वपि भवति । अस्याऽभासोऽत्र सूचितो भवति ।

(३२) 'जिजीविषेत् शतं समाः' । कर्मयोगनिष्ठायाः मानवसमाजः 'शतं जीव्यात्'— एवमपेक्षा कर्तुं शक्यते । कश्चिदस्तोकमपि श्रमं न कुर्यात्, तेनाऽन्येष्वत्यधिको भार आपतेत् ! — एतेन द्वयोरपि तयोः सदाऽऽयुःक्षयो भवति ।

(३३) यथा शतम् निम्बूकानीत्यत्र शतशब्दो व्यवहारे विंशत्यधिकस्य शतस्य बोधको भवति, 'रत्तल' इति (दक्षिणभारतस्य कतिपयप्रदेशेषु प्रचलितस्य) परिमाण-विशेषस्य विषये शतशब्दो व्यवहारे द्वादशाधिकस्य शतस्य बोधको भवति, नामसंस्मरण–(जप) प्रसङ्गे शतशब्दोऽष्टोत्तरशतस्य व्यापको भवति, तथा (मनुष्याणाम्) आयुर्मानं षोडशाधिकं वर्षाणां शतं भवतीति (प्रातरादिसवनत्रयफलव्याख्यावसरे) शिक्षा घोराङ्गि-रसेन श्रीकृष्णायाऽम्नातायामुपनिषद्यायाति (छा० ३।१६)। तस्यां योजनायामादिमानि चतुर्विंशतिर्वर्षाण्यध्ययनस्य, मध्यवर्तीनि चतुश्चत्वारिंशद्वर्षाणि कर्मयोगस्य, अन्तिमान्यष्टा-चत्वारिंशद्वर्षाणि च चिन्तनस्य कृते स्वीकृतानि सन्ति।

(३४) '**अदीनाः स्याम शरदः शतम्**'— 'दैन्यरहिताः सन्तः शतं जीवेम'— एवमस्ति शिक्षा वेदानाम्। 'कुर्वन्नेवेह कर्माणि'– इत्यत्र तदेव सूचितम्।

(३५) 'त्वयि'। यथा माता बालकान् सत्वङ्कारं संबोध्याऽदिशति, तथैवाऽस्मिन्मन्त्रे, तत्पूर्वतरेषु च मन्त्रेषु श्रुत्याऽस्मभ्यं प्रत्यक्षमादेशाः प्रदत्ताः सन्ति। ईदृशानि वचनानि सामान्यबोधपरेभ्योऽन्येभ्यो वचनेभ्यः स्वतोऽधिकं बलवन्ति मन्यन्ते।

(३६) 'इतः' अर्थात् देहे तिष्ठतः। देहे यन्त्रितस्य (जनस्य) कर्मयोगादन्यो नाऽस्ति कश्चिदुपायः। यतः— 'नहि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः' (गीता १८।११)।

(३७) '**न कर्म लिप्यते नरे**' नहि कर्म मनुष्येण सहाऽसङ्क्तुं शक्नोति। अयमस्त्येको महान् सिद्धान्तः। कर्म जडम्, मनुष्यश्चेतनः। मनुष्येण सह तत्कथमासज्जताम्? यदि स्वयं मनुष्यस्तदासञ्जयेत्, तत्वन्यत्!

(३८) 'नरे'— नेतरि। व्युत्पत्त्या 'नर' शब्दो नेतृत्वसूचकत्वेन मतोऽस्ति। मनुष्योऽस्ति कर्मणो नेता। सोऽस्ति कर्मणोऽनुशासकः। कर्म कथं तं बध्नीयात्? उक्तमेव भगवता— 'न मां कर्माणि लिम्पन्ति' (गीता ४।१४)। तन्नरोऽपि पुनस्तस्यैवाऽनुभवं गृह्णातु।

(३९) किं प्रस्तुतमन्त्रोक्तः कर्मनिष्ठाविधिर्ज्ञानिनः पुरुषस्याऽपि कृते विहितो भवेत्? अस्मिन् विषये ब्रह्मसूत्रेण तात्त्विकी चर्चा कृता, एवं निर्णयश्च— विधित्वान्नहि ज्ञानिनि व्यक्तिविशेषेऽपि तु सामान्यतया सर्वेष्वयमादेश इति। ज्ञानी मनुष्योऽपि यदि तम् (विधिम्) अनुसृत्य चलेत्तर्ह्यपि न काचिदापत्तिः। प्रत्युतैतेनाऽपि प्रकारान्तरतस्तस्य ज्ञानस्य गरिमैव भवति। यतस्तस्य (सा) कर्मनिर्लिप्ता स्थितिः (तथा विधिपालनात्) संभवेत्! अधिकं शोभिष्यते च (ब्र. सू. अ. ३।४।१३–१४)।

(४०) गीतासमयात्पूर्वं गीतायाः कर्मयोगं स्मारयत्, ईदृशं स्पष्टं वचनम् नोपलभ्यते।

असुर्या नाम ते लोकाः
अन्धेन तमसावृता ।
ताँस्ते प्रेत्याभिगच्छन्ति
ये के चात्महनो जनाः ॥

अर्थः— आत्मज्ञानेन वैरं कुर्वन्तो ये केचनाऽत्मघातिनो जनाः स्युः, ते देहपातोत्तरम् गाढान्धकारेण व्याप्तामासुरीं योनिमभि गच्छन्ति ।

(४१) 'आत्महनः'— आत्मघातिनः । अर्थादुपर्युक्तस्य मन्त्रद्वयस्य शिक्षणमननुसरन्तः, अर्थाद् भक्तिहीनाः, भोगपरायणाः, लोभिनः, अकर्मण्याश्च मनुष्याः ।

(४२) 'आत्महनः' सेयं भाषौपचारिक्यस्ति । वस्तुत आत्मनो घातोऽसम्भाव्यः । न कस्यचिदपि शक्तिस्तं धर्षयितुं शक्नोति । प्रत्युत सर्वेषां संपूर्णा शक्तिस्तस्यैवाऽधारे स्थिता भवति (दृश्यताम् मन्त्रः ४) । परन्तु बुद्धेरुपाधिं ध्यात्वा, बुद्धिनाशे सत्यात्मनाशोऽभूदितिप्रकारको भाषाप्रयोगो लोके प्रचलति (गीता २।६३) । 'तद्गुणसारत्वात्तद्व्यपदेशः'— अर्थाद् बुद्धिगुणानुसारमात्मनो विषये भाषायाः प्रयोगो भवति । एतद्विषयक एवं न्यायो ब्रह्मसूत्रे समुदीरितोऽस्ति (ब्र. सू. १।३।२९) ।

(४३) 'जनाः'— अर्थात् केवलं जन्मवन्तो नतु सफलनरजन्मानः । नराः कल्पन्ते नारायणीभवितुमपि, परमत्र तेषामेव निर्देशो ये जनत्व एव स्थिताः, 'जन्तु' संज्ञापात्राणि अभवन् ।

(४४) मनुष्यजन्मन उद्देश्यभूतस्याऽत्मज्ञानस्य प्राप्तावेव यैः कुठाराघातः कृतः, ते मनुष्यजन्मनोऽधिकारमपहार्य दीर्घकालमात्मज्ञानमार्गमेवाऽवरुद्धं कुर्वन्ति— एवमस्त्यस्य मन्त्रस्याऽर्थः । द्वितीयमन्त्रस्य 'नरे' इति पदेनेदं सूचितमेव ।

(४५) 'असुर्याः' इत्यस्य स्थाने 'अनन्दाः' इति पाठान्तरमपि बृहदारण्यके [४।४।११] लभ्यते, कठे [१।३] च प्राप्यते । तस्यांऽर्थो भवति— 'आनन्दशून्या दुःखमया' इति ।

(४६) 'असुर्याः' अस्य स्थाने 'असूर्याः' इत्यपि पाठान्तरम् दृक्पथमायाति ।

यस्याऽर्थो भवति – 'सूर्यरहिता', अर्थाद् दर्शनरहिताः । यथोक्तं द्वितीये चरणे— 'अन्धेन तमसावृताः'।

(४७) देहादात्मनो भिन्नत्वं यदि चिन्तयेम, तर्ह्यज्ञानिनो जीवस्य मरणोत्तरगति-विषयेऽवश्यं प्रश्न उपस्थितो भविष्यति । यतो जीवो जडसृष्टौ नहि विलीनीभवितुं शक्नोति, चेतनत्वात् । नैव ईश्वरे च मेलितुं शक्नोति, आत्मज्ञानाऽभावात् । अर्थाद् विशिष्टेन स्वेनाऽहङ्कारेण सहभावात्तस्य सृष्टेरीश्वराच्च द्वाभ्यामेव भिन्नेन रूपेणाऽवस्थान-मनिवार्यम् भवति ।

(४८) 'आसुरी योनिः' इत्यस्या गीतायां 'मूढयोनिः' इति संज्ञाऽस्ति । मूढयोनिः, अर्थादुपनिषद्भाषायामन्धकारवेष्टिता योनिः । अर्थात्पश्वादेर्योनिर्बोद्धव्या । पापेनाऽत्र निपत्यत इति कल्पनयैताम् 'पापयोनिः' इति च कथयन्ति ।

(४९) योनेरर्थेऽत्र लोकशब्दः प्रयुक्तः । अस्याऽर्थः— आलोकः, अर्थात् प्रकाशः । लोचनशब्दः, आङ्ग्लभाषायाः 'लुक' शब्दश्च द्वावप्यस्मात् [लोकशब्दादेव] उत्पन्नौ । निविडान्धकारेण व्याप्तायां योनावपि कोऽपि प्रकाशांशोऽवश्यं भवत्येव ।

(५०) आत्यन्तिको विनाशो न कस्याऽपि संभवति । आसुरयोनेरुद्धारः संभवतीति शास्त्रस्य मतमस्ति । तत्राऽप्यालोकस्त्ववश्यं भवत्येव, कामं स स्वल्प एव भवतु । यदाधारे पश्चात्तापस्येश्वरप्रार्थनायाश्च संभावना भवति । परं मनुष्यजन्मनो विनाशमन्वयमेको महान् दीर्घश्च कार्यक्रमः प्रस्तुतो भवतीत्येतावानेवाऽऽशयोऽस्य । 'आसुरीं योनिं प्राप्ता अधिकाधिकामधोगतिं प्राप्नुवन्ति'। परं ते 'मामप्राप्यैव' यावन्मदभिमुखा न भवन्ति, तावदुक्तामधोगतिं प्राप्नुवन्तीति गीतायां प्रोक्तम् [गीता १६।२०] । सर्वोऽप्ययमर्थः 'अभिगच्छन्ति' इति शब्देऽन्तर्भूतोऽस्ति । 'अभिगच्छन्ति' अर्थादभिमुखा गच्छन्ति । अत्रेदं सूचितम्— ये पतनमभि गच्छन्ति, त उत्थानमभि गन्तुमप्यवश्यमेव शक्नुवन्ति ।

(५१) चतुर्थचरणस्य पर्यायः 'अविद्वांसोऽबुधो जनाः' (बृ. ४ । ४ । ११) इत्येवं बृहदारण्यकेन दत्तः । एतत् खलु 'आत्महनः' इत्यस्य भाष्यम् । 'अविद्वस्' 'अबुध' इत्येताभ्यां द्वाभ्यां विशेषणाभ्यां क्रमशः प्रथमद्वितीयमन्त्रोदीरितायाः शिक्षाया अज्ञानं सूचितम् ।

(५२) अस्मिन् मन्त्रे व्यक्तो विचारो गीतया सविस्तरं षोडशाध्यायस्याऽसुरचरित्रे कृतोऽस्ति ।

(५३) मन्त्रत्रयस्याऽस्मिन्प्रथमे त्रिके जीवनस्य दर्शनं संपूर्णं जातम् । प्रथममन्त्र ईश्वरनिष्ठा, द्वितीयमन्त्रे तदनुसारिणी कर्मयोगनिष्ठा, तृतीयमन्त्र उभयनिष्ठाशून्याऽऽ-त्मघातिनी वृत्तिरासुरी— एवमेतत् त्रिविधं जगदस्ति ।

॥ ४ ॥

अनेजदेकं मनसो जवीयो
नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥

अर्थः— तदात्मतत्त्वं केवलमेकं, नितान्तं चलनादिक्रियारहितं किन्तु मनसोऽप्यधिकं वेगवच्चास्ति । देवास्तद्ग्रहीतुं न शक्नुवन्ति। अनादिकालतो गृहीतवदस्त्यदो देवान्। स्थितमेवाऽदो धावतोऽन्यानत्येति। प्रकृतिमातुरुत्सङ्गे क्रीडन्तः प्राणास्तस्यैव सत्ताबलेन चलनक्रियां पूरयन्ति।

(५४) तृतीयमन्त्र उल्लिखितस्याऽऽत्मतत्त्वस्याऽथवा प्रथममन्त्र उल्लिखितस्येशतत्त्वस्येदं वर्णनम् । ईश आत्मनि च तत्त्वतो नास्ति भेदः (मन्त्रः १६) । अस्मिन्मन्त्रे नपुंसकलिङ्गप्रयोगोऽभूत् । य एतदेव तत्त्वं लक्षीकरोति । अन्यथा 'ईश' 'आत्मन्' एतौ द्वावेव शब्दौ पुंलिङ्गिनौ । एतत्तु तदेव खलु तत्त्वम्, यद् 'ब्रह्म' इति कथयन्ति, (दृश्यताम् टिप्पणी २०२) । ब्रह्म निसर्गतो नपुंसकलिङ्गमस्ति ।

(५५) आत्मतत्त्वस्यैतद्वर्णनं मिथोविरोधिभिर्विशेषणैः पूरितं साधारणतर्कशास्त्रदृष्ट्या बाधाजनकं भवितुं शक्नोति । साधारणं तर्कशास्त्रं स्थितिगत्योरेकत्रभावमसंभवं मन्यते । परं वेदान्तस्यैवं विशिष्टस्तर्कोऽस्ति— 'एवंप्रकारकं मिथोविरोधि द्वन्द्वं सम्यक्तयैवैकत्र स्थातुं शक्नोति'। अस्यैव विशिष्टतर्कस्य शास्त्रीयं नामाऽस्ति 'वितर्कः' इति । आङ्ग्लभाषायामेतत् 'डाएलेक्टिक्स' इति कथ्यते । योगशास्त्रमाख्याति— एवं वैतर्किकविचारप्रणाल्या जगद्विषये ज्ञानं स्थिरीकृत्य य आत्मनि लीनीभवितुं शक्नोति, स 'संप्रज्ञात'–समाधिं प्राप्नोति (योगसूत्र १।१७) । दृश्यते ह्येतामेव वितर्कप्रणालीमवलम्ब्य 'ईशावास्यो'–पनिषदा त्यागभोगादिकं विविधं द्वन्द्वं समाहितम् । परमेषा वितर्कप्रणाली सामान्यतर्कशास्त्रिणां कथं बुद्धिगता स्यात् ? । तत्कल्पिते सीमितपरिधौ सा (वितर्कप्रणाली) कथं तिष्ठेत् ? अस्य कृतेऽग्रतो वितर्कवादस्य युक्तिविचारकैर्गवेषिता । कुविचारवाचकत्वेन य एकः 'वितर्क'– शब्दो रूढोऽस्ति, ततोऽस्मिन् शास्त्रीये 'वितर्के' भ्रमो न कर्तव्यः ।

(५६) **मनसा जवीयः**— मनसो वेगः प्रसिद्ध एव । त्रिषु कालेषु, दशसु दिक्षु, अन्तर्बाह्यायां सृष्टौ, असृष्टौ, प्रतिसृष्टौ च सर्वत्र विशालाऽस्य गतिरस्ति । नाऽस्त्येव मनसो गतिमानम् । परमीदृशान्यनन्तानि मनांसि यस्य कोणे (एकप्रदेशे) विलीनानि भवन्ति, तस्य महतो वेगस्य वर्णनं कैर्वा शब्दैः क्रियेत ?

(५७) अत्र 'देव'-शब्देन शरीरस्य प्रकाशद्वाराणि (ज्ञानेन्द्रियाणि) अवगन्तव्यानि । वस्तुतो 'देव'-शब्दो ब्रम्हाण्डदिव्यशक्तिवाचकोऽस्ति । ब्रह्माण्डपिण्डानामेव प्रतिबिम्बनादेताः शक्तय इन्द्रियरूपाः पिण्डेष्ववतरन्ति । इन्द्रियशब्दार्थोऽपीन्द्रशक्तिरेव । 'इन्द्र'— अर्थात् 'इदंद्रष्टा' (ऐ० १।३।१४) । ब्रम्हाण्डे परमात्मा, पिण्डेऽन्तरात्मा । तस्य दर्शनशक्तयः खल्विन्द्रियाणि ।

(५८) **'पूर्व अर्षत् इति पुरुषः'**— पुरुषशब्दस्यैवमेका निरुक्तिरेवाऽत्र सूचिता । (पुरुषशब्दस्याऽन्यनिरुक्तयो द्रष्टव्या १६६ टिप्पण्याम्) । (तथैव 'अर्षत् इत्यस्यार्थो द्रष्टव्यः १५८ टिप्पण्याम्) ।

(५९) **'तद् धावतोऽन्यानत्येति तिष्ठत्'**— सर्वे धावन्त आकाशे धावन्ति । आकाशं तु कुत्र धावतु ? तेन 'तिष्ठत्' (तिष्ठतैव) भाव्यम् । परन्तु स (आत्मा) आकाशस्याऽप्यस्त्यन्तर्यामी । **'आकाशे तिष्ठन् आकाशमन्तरः यमयति' (बृ० ३।७।१२)** स तिष्ठन्मूर्तिरित्येवाऽभिधातव्यः । अतो भक्तास्तं वर्णयन्ति— युगे अठ्ठावीस विटे वरी उभा ! अर्थात् 'अष्टाविंशतयो युगानि व्यतीतानि, एष भगवानिष्टकायामेवाऽवस्थितोऽस्ति' । तस्य तथाऽवस्थान एवाऽसीमा प्रेरणाऽन्तर्हिता (पूर्णा) ऽस्ति । गीता यदकर्मणि कर्म कथयति, तदेतदेवाऽस्ति ।

(६०) **'अपः'**—(१) 'अप' शब्दस्य बहुवचनम् । अर्थः— जलप्रवाहः । (२) 'अपस्' शब्दस्यैकवचनम् । अर्थः— कर्म (लैटिनभाषायाम् 'ओपस्') । तर्हि कतरोऽर्थोऽत्र ग्राह्यः ? वस्तुत एतौ द्वौ शब्दौ 'अप्' इति गतिवाचकस्य प्राचीनधातो रूपे स्तः । अतोऽत्र वेदस्वरानुसारेण 'अपः' इत्येतद् बहुवचनं स्वीकृत्य तस्यार्थ उक्तकल्पनाद्वययोगेन कर्मप्रवाह इति स्मर्तव्यः । 'अपो दधाति' अर्थात् कर्मप्रवाहस्य निर्माणं करोति । अर्थात् प्रस्पन्दनं कुर्वद् भवति (आत्मतत्त्वम्) ।

(६१) **'मातरिश्वा'** । सर्वत्र गतिसञ्चारं कुर्वत्प्राणतत्वं प्रकृत्यन्तर्गतं सत् समस्तप्राणिनां तथा सूर्याचन्द्रादीनां च गतेः कारणत्वेन मतमस्ति । तदेव 'तस्मिन्सति' अर्थादात्मनः सत्ताबलेन कार्यं करोति । आत्मसत्तया विनाभूतं तन्निर्बलमेव सिद्धं भवति ।

(६२) प्रकृतेरत्र 'माता' इति संज्ञाऽस्ति। अर्थात पुरुषश्च 'पिता' इत्यभिधास्यते (गीता १४।४) । सैषोपमाऽग्रतः कल्पनाकुशलैः कविभिरेवं विस्तारिता— 'नारीष्वधिकतया प्रकृतितत्वस्य, नरेषु चाऽधिकतया पुरुषतत्वस्यांऽशोऽवतीर्णो भवतीति'। विचारकैरेवं मान्यताप्रदानेऽहमहमिका कृता। रूपकजनितोऽनर्थः किंसीमो भवेदिति बोधायैतदुदाहरणमेकमस्ति।

(६३) अस्य मन्त्रस्य चतुर्षु चरणेषु मनसा, ज्ञानेन्द्रियैः, कर्मेन्द्रियैः प्राणतत्वेन च साकं तुलनां कृत्वाऽऽत्मनः शक्तिर्दर्शिता।

(६४) वस्तुत इन्द्रियादिभिः सहाऽत्मनस्तुलना नैव संभवेत्। एतदेव ह्यत्र कृतायास्तुलनायास्तात्पर्यम्। केनोपनिषदः प्रथमे खण्डेऽस्य सविस्तरं विवेचनं जातम्।

(६५) अत्र जगति समस्तप्राणिनां सर्वाः प्रवृत्तय आत्मन आधारे चलन्ति। नाऽत्राऽस्ति काचित् पृथक्सत्तेतराऽऽत्मसत्तायाः। एतद्विविच्य प्रथममन्त्रस्य शिक्षानुसारमहन्ताया ममतायाश्च निरासो मानवानां कर्तव्यो भवति। सर्वत्र भगवतोऽधिष्ठानं द्रष्टुमस्माभिः शिक्षणीयमस्ति। 'भगवन्ता चें अधिष्ठान पाहिजे'— एषाऽस्ति सूक्तिः प्रसिद्धा समर्थरामदासस्य।

॥ ५ ॥

तदेजति तन्नैजति
तद् दूरे तद्वदन्तिके ॥
तदन्तरस्य सर्वस्य
तदु सर्वस्याऽस्य बाह्यतः ॥

अर्थः— तत् चलति, तत् न चलति च। तद् दूरेऽस्ति तत् अन्तिके चाऽस्ति। तत् अस्य सर्वस्य अन्तर्वर्तते। तत् अ सर्वस्य बहिश्च वर्तते।

(६६) अत्राऽऽत्मतत्वस्य व्याप्तिर्दर्शिता। प्रथमे चरणे 'तत् चलति, न चलति इत्येव शक्तिदर्शकत्वेन दर्शितेऽपि तस्यार्थः 'स्थिरं चरं च' द्वयं तदेवेति व्याप्ति सूचय गीताया निम्नलिखितसमानार्थकश्लोकत एतद ध्यानगम्यं भवति—

बहिरन्तश्च भूतानामचरं चरमेव च
सूक्ष्मत्वात् तदविज्ञेयं, दूरस्थं चाऽन्तिके च यत्
(गीता १३।१५)

(६७) 'दूर' 'निकट' इति शब्दाभ्यां कालोऽवकाशश्च द्वावेव स्मर्तव्यौ। सर्वासु भाषास्वेतौ शब्दौ कालावकाशयोर्द्वयोरेवाऽवबोधकौ भवतः। द्वावेवाऽपरिमेयौ स्तः। परं तौ द्वावेवाऽऽत्मनो व्याप्तौ विलीनीभवतः।

(६८) अन्तःस्थो द्रष्टा, बाहीकं दृश्यं चैतयोर्द्वयोरेव रूपयोः परमात्मैव राजते। "अन्तर्हरिर्बहिश्च हरिः– **हरिणा गृहेऽवरुद्धम्**" एवमस्त्येषाऽवस्था।

(६९) यदा वयं कथयामः— 'बहिरन्तारूपेण, दूरान्तिकरूपेण, चराचररूपेण च परमात्मैव व्यापकोऽस्तीति'। तदैतन्मदीयमिदं परकीयम्, एतदन्तरङ्गम्, एतच्च बहिरङ्गमित्यादीनां भेदानामवकाश एव नो संभवेत्। एतदेवाऽग्रिमे मन्त्रे स्पष्टीकृतमस्ति।

(७०) चतुर्थपञ्चमौ श्लोकौ संयोज्य वयमीश्वरस्य (१) एकताम् (२) निष्कम्पताम् (३) वेगवत्ताम् (४) सर्वाधारताम् (५) चराचरमयताम् (६) दिक्कालव्यापिताम् (७) द्रष्टृदृश्यस्वरूपताम् च ध्यायाम, गायाम, अनुभवाम च !

॥ ६ ॥

यस्तु सर्वाणि भूतानि
आत्मन्येवाऽनुपश्यति ।
सर्वभूतेषु चाऽऽत्मानं
ततो न विजुगुप्सते ॥

अर्थः–यो निरन्तरमात्मनि समस्तानि भूतानि, समस्तेषु च भूतेष्वात्मानं च पश्यति, न भूयः स कस्मिंश्चिदपि घृणापरो भवति।

(७१) अस्य समानार्थकः श्लोकः—

सर्वभूतस्थमात्मानं सर्वभूतानि चाऽत्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ (गीताः ६।२९)

(७२) विचारदृष्ट्याऽऽत्मनि समस्तभूतानी (चराचरवस्तूनि) त्येतत्संश्लेषणम्, तथा ' समस्तभूतेष्वात्मे'त्येतद् विश्लेषणं चाऽस्ति (गीता १३।३०)

(७३) उपासनादृष्ट्या ' आत्मनि सर्वभूतानी ' त्येतद्विसर्जनम्, सर्वभूतेष्वात्मे-त्येतदावाहनं चाऽस्ति । प्रथमत आवाहनम्, तदनु विसर्जनमेवाऽस्त्युपासनायाः पद्धतिः । आवाहनमर्थात्सृष्टिशास्त्रस्य भाषायामुत्पत्तिः, विसर्जनमर्थात् प्रलयः ।

(७४) आचारदृष्ट्या ' आत्मनि सर्वभूतानि ' इति कथनेन विशुद्ध आत्माऽर्थो निष्पादितो भवति, ' सर्वभूतेष्वात्मा ' इति कथनाद् व्यापकः ' परार्थश्च ' । उभयतो हीनस्य, संकुचितस्य च स्वार्थस्योच्छेदो भवति । तत आत्मौपम्यस्य जन्म भवति (गीता ६।३२)

(७५) ' सर्वाणि भूतानि आत्मन्येव ' इत्यत्र ' एव ' कारः किंप्रयोजनकः ? स विश्लेषणतः संश्लेषणस्य, आवाहनतो विसर्जनस्य, परार्थत आत्मार्थस्याऽधिकं महत्वमाध्या-त्मिकदृष्ट्या सूचयति । पूर्वत्रिकस्योत्तरत्रिके पर्यवसानं कारयितव्यम् ।

(७६) ' आत्मन् ' शब्दस्य व्युत्पत्तिश्चतुर्भिः प्रकारैः क्रियते । ते च प्रकारा एकस्मिन्नेव श्लोक एवं सङ्गृहीताः सन्ति—

यदाप्नोति यदादत्ते यच्चाऽत्ति विषयानिह
यच्चाऽस्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते ॥

' आप ' व्याप्तौ, ' आ + दा ' आदाने, ' अद् ' भक्षणे, ' अत् ' सातत्यगमने – एता हि चतस्रो व्युत्पत्तयः । परमेताः सर्वाः काल्पनिक्य इति मन्मतम् । एतास्वन्तिमा व्युत्पत्तिर्वास्तविकतायाः किञ्चिन्निकटेऽस्तीति कथयितुं शक्यते । वस्तुतो मन्मते ' आत्मन् ' शब्दः ' आत् ' धातो रूपमस्ति । ' आत् ' पूर्ववैदिको धातुरस्ति । संस्कृतेऽस्य लोपो जातः । परं ज्ञानेश्वर्या मराठ्यां यथायथं, तामिलादिद्राविडभाषास्वपभ्रष्टरूपेणैष धातुः प्रकटी-भूतोऽस्ति । 'आत् ' इत्यस्य भूतकृदन्तो ज्ञानेश्वरीभाषायाम् ' आतला ' भवति । मूलत ' आत् ' इत्यस्याऽर्थः ' अस्भुवोः ' अन्तराले भवति । यद्यप्यस्याऽर्थभेदस्याऽर्वाक्समये लोपो जातस्तथापि विचारदृष्ट्यैष (अर्थभेदः) महत्वपूर्णोऽस्ति । ' अस् ' अर्थात्केवलं भवनम् – निर्गुणसङ्केतः । ' भू ' अर्थाद् विविधभावयुक्ततया स्थितिः – सगुणसंकेतः । ' आत्

अर्थाद्यथा संभवति तथा भवनम्। सैषा मध्यमा स्थितिः— सगुणगर्भस्य निर्गुणस्य संकेतः। आत्मन्नित्यस्य सहचारी, परमात्मवाचकः 'भूमन्' शब्द उपनिषत्सु लभ्यते। स्थूलरूपेण द्वयोरेव तयोरेक एवाऽर्थो भवति। सूक्ष्मम् यदि दृश्येत 'भूमन्' इति विशेषणम् सगुणं भवति। 'भूमन्' इत्यस्याऽस्ति भूधातोरुत्पत्तिः। समीक्षिते त्वेष भेदः स्पष्टीभवति। 'भूमन्' शब्दस्य व्युत्पत्तिः पाणिनिना 'बहु + इमन्' एवमाख्याता। 'आत्' इत्यस्य मूलभूतः पूर्ववैदिको धातुः संभवेदविदित एव स्यात् पाणिनेः। यदि सोऽज्ञास्यत्तर्हि तस्य 'आत् + मन् = आत्मन्' तथैव 'भू + मन् = 'भूमन्' एवं व्युत्पत्तिं सोऽकरिष्यत्! एवं बुद्धावस्फुरणादेव 'अणिमन्' 'गरिमन्' इत्यादिवर्गे 'भूमन्'— शब्दस्य पाठव्यवस्था तस्य करणीया जाता। संभवत उपनिषत्सु 'भूमन्'— शब्दो यत्र पठितस्तत्र तत्र सोऽल्पाऽर्थ-विरोधिरूपेणोपस्थापितः। संभवेदत एव पाणिनेरेवं करणीयाऽवश्यकता प्रतीता स्यात्! परन्तु 'भूमन्'— शब्दस्य भूधातोरुत्पत्तिस्वीकारे स विश्वरूपस्य परमात्मनो वाचको भवति। पुनर्विश्वरूपे बहुत्वमप्यापतत्येव। किं बहुना, बहुशब्दो मूलदृष्ट्या भूधातोरेव रूपमस्ति। इतो विचारिते न लघुरपि कठिनताऽऽपतति। परन्तु ब्रह्मन्निति निर्गुणस्य, आत्मन्निति सगुणनिर्गुणयोः, भूमन्निति सगुणस्य चैवं भेदोऽपि यदि विश्लेषणाय क्रियेत, तर्ह्यप्यन्ततो गत्वैतत् सर्वं विस्मृत्य **'ईशावास्यमिदं सर्वम्'** एतावदेव पर्यवसेयं भवति। एतदेव हीत उत्तरेषां मन्त्राणां, संपूर्णाया ईशावास्योपनिषदश्च सारभूतमस्ति।

(७७) **'न विजुगुप्सते'** अर्थान्नोद्विग्नो भवति। उद्वेगशब्दतः निन्दा-तिरस्कारघृणादिकाः स्थूलवृत्तयो बोद्धव्या एव। परं सूक्ष्मतमस्य दूरीभावस्याऽन्तरायस्य च तत्र समावेशो भवत्येव। यतः— 'जुगुप्सते' इत्यत्र 'गुप' धातुरिच्छार्थकोऽस्ति। तस्याऽक्षरार्थो भवति— स्वस्य पृथक्स्थापनं, गोपनं च।

(७८) **'ततो न विजुगुप्सते'** इत्यस्य स्थाने **'ततो न विचिकित्सति'** इतीदमपि पाठान्तरमस्ति। यस्याऽर्थो भवति— 'तस्य पुनर्न कोऽपि संशयोऽवशिष्यते।

(७९) **'ततो न विजुगुप्सते'**। सर्वभूतेष्वहम्, मयि च सर्वाणि भूतानीत्येवं विशालतमं मातृहृदयं यस्याऽस्ति, स कथं नामोद्विग्नो भवेत्! अतो भक्तस्यैकं लक्षणमस्ति— **'यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः'** **(गीता १२।१५)**।

॥ ७ ॥

यस्मिन् सर्वाणि भूतानि
आत्मैवाऽभूद्विजानतः ।
तत्र को मोहः कः शोकः
एकत्वमनुपश्यतः ॥

अर्थः– यस्य दृशि सर्वाण्येव भूतान्यात्मायन्ते, तस्य निरन्तरमेवमेकत्वं भावयतो विज्ञानिनः पुरुषस्य कुतो मोहः, कुतो वा शोकः !

(८०) गतमन्त्रे यत्सूचितम्, तदनुसारेण यद्यपि मातृहृदयं घृणापरं न भवति, तथापि तस्य मोहः संभवति । एवमाशङ्कां प्रकल्प्य तन्निरसनाय सोऽयं मन्त्रोऽस्ति ।

(८१) गतमन्त्रो भक्तिप्रेमपरकोऽस्ति । अतस्तत्रौतप्रोततताया भाषा प्रयुक्ता । अयम् मन्त्रो ज्ञानपरकोऽस्ति । एतदनुसारमत्र केवलमेकताया भाषा प्रयुक्ताऽस्ति । वस्तुतो द्वयमप्येकमेवाऽस्ति । ओतप्रोतता यत्र संकुचिता भवति— यथा कस्याश्चिन्मातुश्चत्वार्यपत्यानि सन्ति— तत्र मोहः संभवति । परन्तु विश्वव्यापिन्यामोतप्रोततायां नैष दोष आयाति । अतो गतमन्त्रोऽपि निर्भय एवाऽस्ति । एतद्धि निश्चप्रचम्, यत् – निर्द्वन्द्वैकतैव हि व्यापकतमाया ओतप्रोतताया अभिधानम् ।

(८२) 'आत्मैव सर्वाणि भूतानि' प्रथममन्त्रस्य 'ईशावास्यमिदं सर्वम्' इति च द्वयमप्येकैव भावनाऽस्ति । एकाऽऽत्मज्ञानस्य भाषा, अन्या भक्तेः ! एतावद्धि केवलमन्तरम् ।

(८३) '**विजानतः**' ज्ञानमर्थाद् बुद्ध्याऽवगमः । विज्ञानमर्थाद् जीवनेऽनुभवः । ज्ञानाऽनन्तरं तस्य ज्ञानस्याऽऽचरणेन, कृत्या वाऽऽत्मसाक्षात्कारे कृते तत् (ज्ञानम्) तस्यैव (प्रयोक्तुः) विज्ञानं भवति । ज्ञाता + कर्ता = विज्ञाता । (२ टिप्पण्यामेतस्य विवरणमस्ति कृतम्)।

(८४) '**अनुपश्यतः**' । गतमन्त्रेऽस्मिन्मन्त्रे च केवलं दर्शनतोऽसन्तुष्य पुनरनुदर्शनस्याऽपेक्षणं विहितम् । अनुदर्शनमर्थात्सततदर्शनम् । कस्मिश्चन विशिष्टे क्षणे

विद्युत्स्फुरणमिव प्रातिभदर्शनं यदि भवेत्, तदाऽपि न तावता पर्याप्तिर्भवेत्। तत्त्वैकयाथ्या-सनमात्रं खलु ! सूर्यप्रकाशवन्निरन्तरदर्शनस्याऽस्त्यावश्यकता ! तत एव हि भवेद् भवक्षयः।

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवद् ज्ञानं प्रकाशयति तत्परम्॥ गीता ५।१६)

(८५) एकतायाः सततदर्शनमनेकताया विलयनेनैव संभवति। यद्येकताया अनेकतया सह विरोधश्चलन् भवेत्, तर्हि समाधिरूपाद व्युत्थानरूपाच्च व्याधेर्मुक्तिर्न संभवति।

(८६) शोको मोहश्च सहोदरौ स्तः। सङ्कुचिताया आत्मीयताया मोह उत्पद्यते। स देहवियोगादिकेष्ववसरेषु शोकहेतुर्भवति। व्यापिकायामात्मीयतायामेष न संभवति। अतो व्यापिकाऽऽत्मीयता देहं परतः कृत्वैवोत्पद्यते। आगामिनि मन्त्र एतदेव स्पष्टीकृतमस्ति।

(८७) 'ईशावास्यो'पनिषदा गीताया घनिष्ठः सम्बन्धोऽस्ति। अत्रत्यशोकमोहशब्दौ गीताया आख्यायिकामपि (अर्जुनविषादयोगात्मिकाम्) स्मारयतः।

॥ ८ ॥

स पर्यगाच्छुक्रमकायमव्रणम्
अस्नाविरं शुद्धमपापविद्धम्
कविर् मनीषी परिभूः स्वयम्भूः
याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः॥

अर्थः–स तेजस्वि, देहरहितम्, अत एव व्रणादिदेहदोषैः स्नाय्वादिभिर्देहगुणैश्च सर्वथाऽलिप्तम्, शुद्धम्, पापवेधमुक्तं चैतादृशं तदात्मतत्त्वं सर्वतः परिवेष्ट्य स्थितोऽस्ति। स कविरर्थात्क्रान्तदर्शी, वशी, व्यापकः, स्वतन्त्रश्चाऽस्ति। स शश्वत्स्थास्नून् सर्वानर्थान् यथावदसाधयत्।

(८८) एतदात्मवर्णनपरममत्वाऽऽत्मज्ञवर्णनपरं मन्तव्यम्। तथात्वे मन्त्रः सरलो भवति। 'सः' कर्ता, 'शुक्रम्' कर्म, 'पर्यगात्' क्रियापदम्। गतमन्त्रद्वय आत्मज्ञवर्णनात्ते-नाऽस्यैकवाक्यता भवति।

(८९) '**अपापविद्धम्**' इन्द्रियादिषु पापवेधश्चलितुं शक्नोति, नाऽऽत्मनि। एतस्य विवरणं बृहदारण्यकस्यैकस्यामाख्यायिकायां कृतमस्ति (बृहदारण्यक १।३, मन्त्रः २।७)। बृहदारण्यकोपनिषदीशावास्योपनिषद एवैकं भाष्यमस्ति।

(९०) '**शुक्रम् अकायम्**' इत्यादिशब्दैः क्षेत्रस्य (शरीरस्य), क्षेत्रज्ञस्य (आत्मनः) च स्वरूपं प्रदर्शितम्। यथा खड्गाऽधान्याः खड्ग आकृष्यते, तथैव देहात्तत्राऽवेष्टित आत्मतत्वे सूक्ष्मबुद्ध्या धैर्येण चाऽऽकृष्टे सति तद्गतमपरं ज्योतिः प्रकटीभवति (कठ ०६।१७)।

(९१) आत्मज्ञः पुरुषोऽत्र **कवि** रित्यन्वर्थनाम्नाऽभिहितः। कविरर्थात्क्रान्तदर्शीति निरुक्तं कथयति। क्रान्तदर्शी—अर्थात् पारदर्शी, देहजवनिकामपसार्य तत्परतो यो द्रष्टुं शक्नोति। ईदृशेषु पारदर्शिषु कविषु स आत्मज्ञानी शिरोमुकुटायते '**पदवीः कवीनाम्**' (ऋग्वेद)।

(९२) आत्मज्ञपुरुषवर्णनाऽवसरे प्रतिभावतः कवेरपि लक्षणान्यत्र प्रसङ्गतः, परं सम्यवतया दर्शितानि। ❀

(९३) मनस ईष्ट इति '**मनीषी**'— यो मनसि स्वसत्तां चालयितुं शक्नोति, मनस्यावश्यकताऽनुसारं नियन्त्रणं स्थापयितुं शक्नोति, तच्चाऽवश्यकताऽनुसारं कार्ये विनियोक्तुं शक्नोति। ईशावास्यमीश्वरोपासनायाः शिक्षिकोपनिषदस्ति। ईश्वरोपासकस्य यथासंभवं स्वक्षत्र ईश्वरेणैव भवितव्यम्। अस्मिन्मन्त्रे बोधितस्य क्षेत्रक्षेत्रज्ञविवेकस्याऽपि ह्ययमेव परिणामोऽपेक्षितोऽस्ति।

(९४) '**कविः**' '**मनीषी**' चैते परस्परपूरके विशेषणे स्तः। दर्शनशक्तेर्निरोधशक्तेश्च द्वयोरेव योगेन भाव्यम्। तस्यैव प्रक्रियाऽग्रिमे मन्त्रत्रिकद्वये (नवममन्त्रादारभ्य चतुर्दशमन्त्रं यावत्) प्रतिपादिताऽस्ति। गीतया तत्कृते बुद्धिधृती संयोज्यैकस्य संयुक्तसाधनस्य प्रकल्पना कृताऽस्ति। एका नौका, द्वितीया क्षेपणी ! ते द्वे संयोज्यैव तरणसाधनं प्रस्तुतं भवति (दृश्यताम् टिप्पणी १२९)।

(९५) '**परि+भू**' इत्यस्य 'सर्वोपरि' अथवा 'सर्वातिक्रमकारी' त्यर्थः क्रियते। परन्त्वयमर्थो लौकिकसंस्कृते भवति। वैदिकसंस्कृतानुसारं 'परिभू' अर्थात् 'सर्वतः परिवेष्ट्य स्थितः', 'व्यापकः' एवमर्थो भवति।

❀ जिज्ञासवः 'विनोबाके विचार' इतिनामके पुस्तके 'कविके गुण' नामकं लेखं पश्यन्तु।

(९६) 'परिभूः' 'स्वयम्भू'श्च परस्परपूरकौ विशेषणशब्दौ स्तः । ब्रह्मसूत्रस्य भाषायां 'सर्वापेक्षायाः, अनपेक्षायाश्च' अर्थात्सर्वसंग्राहकबुद्धेरन्यनिरपेक्षस्वतन्त्रवृत्तेश्च द्वयोरेव योगेन भवितव्यम् । एकाऽऽत्मनो व्यापकतायाः, द्वितीयाऽऽत्मनः संपूर्णतायाश्च निष्पन्ने भवतः ।

(९७) '**याथातथ्यतः**' शब्दो विवरणस्वरूपो दृश्यते । तत्त्यागाच्छन्दोऽभग्नं भविष्यति । (अनुवादतोऽपि 'यथावत्' शब्दो निष्कासनीयः) अन्तिमौ द्वौ चरणावेवं पठनीयौ—

कविर् मनीषी परिभूः स्वयम्भूः
अर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः

(९८) "**अर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः**"। व्यदधात् अर्थादसाधयत्, समपादयत् । तेनाऽर्थाः संपादितचराः । आत्मज्ञस्य पुरुषस्य नैव किमपि संपादनीयमस्ति । शाश्वताय कालाय तेन पर्याप्ता सामग्र्युपकल्पिताऽस्तीत्येवमर्थो भविष्यति । 'नाऽनवाप्तमवाप्तव्यम्'— गीता (३।२२) ।

(९९) देहातीतो भूत्वा येन शाश्वतोऽर्थः (परमार्थः) साधितः, तस्य कुतोऽर्थलोभो भवेत् ? अतः 'मा गृधः कस्यस्विद्धनम्' इत्याज्ञाऽत्र स्वतः फलिता, उन्मूलिता च । अर्थात्कृतार्थीभूय कुण्ठिताऽभूत् ।

(१००) ६-८ मन्त्रत्रिक आत्मज्ञपुरुषस्य गुणचरित्रवर्णनमेवं कृतमस्ति—

(१) ओतप्रोतं विश्वप्रेम
(२) केनचिज्जनेन वस्तुना वाऽरुचेरुद्वेगस्य वाऽभावः
(३) विश्वात्मैक्यदर्शनम्
(४) नो मोहः न च शोकः
(५) विदेहस्थितिः
(६) पारदर्शिता, वशिता, व्यापकता, स्वतन्त्रता
(७) शाश्वताऽर्थानां लाभः

(१०१) देहं विदार्य यद्यात्मनो बहिः कर्षणं कर्तव्यं भवति, तर्हि तदर्थं साधनेन तीक्ष्णेन सूक्ष्मेण च भवितव्यम् ।*

---

* अग्रिमेषु षट्सु मन्त्रेषु तत्प्रक्रियोपदिष्टाऽस्ति ।

अन्धं तमः प्रविशन्ति ये अविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥

अर्थः- येऽविद्यायां निमग्नाः, ते घोरमन्धकारमभि चलिताः । ये विद्यायां रताः, मन्ये- ते तु घोरादपि घोरमन्धकारमभि चलिताः ।

(१०२) अविद्या विद्या चैते द्वे एवैकस्य वस्तुनो निवृत्तप्रवृत्ते (निगेटिभ, पोजेटिभ) अङ्गे स्तः । तदनुसारं तयोः फलमप्येकादशे मन्त्रे निवृत्तप्रवृत्तस्वरूपे प्रदर्शिते स्तः । अविद्याऽर्थादिष्टेऽर्थेऽनधिकृतस्याऽनन्तस्य ज्ञानस्य त्यागः । विद्याऽर्थाऽदिष्टेऽर्थेऽधिकृतस्य विशिष्टज्ञानस्य ग्रहणम् । एतयोरर्थयोस्तौ द्वौ शब्दौ (विद्याविद्ये) ईशावास्योपनिषदः पारिभाषिकौ स्तः । (एतदतिरिक्तम् १३३ टिप्पणी दृश्यताम्)

(१०३) अविद्यातोऽपेक्षिता लाभाः — (१) बुद्धावभारः, (२) प्राणशक्तिसञ्चयः (३) नम्रभावश्च । विद्यातोऽपेक्षितो लाभस्तु — बौद्धिकं दिग्दर्शनम् । विद्याऽविद्या च द्वे एवैते विना मिथःसाहाय्यमकिञ्चित्कर्यौ भवतः ।

(१०४) विद्याहीनाऽविद्या, अविद्याहीना विद्या च नैव केवलमकिञ्चित्कर्यावपित्वनर्थकारिण्यौ च सिद्धे भवतः । अतः केवलमेकस्याऽश्रयस्त्वन्धकार एव कथितः ।

(१०५) परमेतयोः कतरस्याऽश्रयो घोरोऽन्धकारो भवेदेतद्धि दुर्वचम् । '**भूय इव**' इत्यत्र पठितेन 'इव' शब्देनैतत्सूचितम् । तथात्वेऽपि वरं केवलमविद्या सकृद्ग्राह्या, परं केवला विद्या तु नैव ग्राह्येतीवाऽत्र कथितम् । यतो विद्याहीनाया अविद्यायाः (कारणात्) यदि ज्ञानशून्या जडतोत्पद्येत, अन्यतोऽविद्याहीनाया विद्यायाः प्राणहीनताऽहङ्कारश्चोत्पद्येयाताम् । अयं परिणामोऽधिकं भयङ्कर इतीवाऽत्र कथितम् ।

(१०६) केवलायामविद्यायामेकविधा लयवृत्तिर्भवति । अस्यैवाऽर्थस्य सूचकोऽस्त्यत्र 'उपासते' शब्दः । एषा (लयवृत्तिः) निद्रया सह तुलयितुं शक्यते । एतद्विपरीतं केवलायां विद्यायां विविधानन्दभोगकरी वृत्तिर्भवति । अस्याऽर्थस्य सूचकोऽत्र 'रताः' शब्दोऽस्ति । एषा (द्वितीया भोगवृत्तिः) जागरया सह तुलयितुं शक्यते । अभीष्टा तु सैवाऽऽत्मनिष्ठाऽस्ति, योभयदोषरहितोभयगुणसंपन्ना चाऽस्ति । अयमेव न्यायो द्वादशस्य मन्त्रस्य (लक्ष्यभूते) निरोधे विकासे च चरितार्थो भवति ।

अन्यदेवाहुर् विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस् तद् विचचक्षिरे ॥

अर्थः— आत्मतत्त्वं खलु विद्यातो भिन्नमेव कथितम्, अविद्यायाश्च । तेभ्यो धीरपुरुषेभ्योऽस्माभिरेवं श्रुतम्, येऽस्मान् तत् (आत्मतत्त्वम्) दर्शितवन्तः ।

(१०७) 'विद्यया' 'अविद्यया' चेत्यत्र तृतीयाविभक्तिः पञ्चम्यर्थाऽस्ति । त्रयोदशान्मन्त्रादेतद् ध्यानगतं भवति । एवं तृतीया पञ्चम्यर्थे भवेत् । वेदेष्वेवमनेकवारान् प्रयोगः प्रचलति । एतदतिरिक्तमत्रैव स्थाने यजुर्वेदस्य माध्यन्दिनपाठे 'विद्याया' 'अविद्याया' चैवं पाठो दृश्यते । छन्दःसौकर्यायोपनिषदैवं विभक्तिव्यत्ययः कृतः ।

(१०८) 'विद्याऽविद्ये ईशते यस्तु सोऽन्यः'— (श्वेताश्वतर ५।१) । (विद्याया अविद्यायाश्च चालको द्वयोरेवैतयोर्भिन्नोऽस्ति) अस्माद् वाक्यात् प्रस्तुतमन्त्रस्य वाक्यरचनायां प्रकाशः प्रतिफलति ।

(१०९) अत्राऽग्रिमे त्रयोदशे मन्त्रे चाऽऽत्मतत्त्वम् (ब्रह्म) 'तत्' इति शब्देन बोधितम् । 'तत् त्वम् असि' इति महावाक्यस्यैतदेव हि प्रथमं पदम् । 'तत्' इति परतः स्थितं वस्तु, यत्सर्वेभ्यो द्वन्द्वेभ्यः परतोऽस्ति । तदेव हि ज्ञातव्यम् ! तदेव च प्राप्तव्यम् ! तत्रैव 'त्वम्' इत्यस्य विलयनं कर्तव्यम् ।

(११०) आत्मतत्त्वं हि विद्याया अविद्यायाश्च द्वाभ्यामेव परतःस्थितमिति कथितमस्ति । यतस्तत्तु मम स्वरूपमेवाऽस्ति । मामेव कथमहं जानीयाम्, कथं वा नो जानीयाम् !

(१११) ज्ञानमज्ञानं चेत्येताभ्यां द्वाभ्यामेवाऽऽत्मतत्त्वमथवाऽऽत्मज्ञानं पृथगस्ति । अस्य मन्त्रस्याऽप्यमर्थः साल्पशब्दभेदं केनोपनिषदो निम्नश्लोकेन संवदते—

अन्यद् एव तद् विदितात् अथो अविदितात् अधि ।
इति शुश्रुम पूर्वेषां ये नस् तद् व्याचचक्षिरे ॥
(केन० १।३)

(११२) 'अन्यत् एवाहुर्विद्यया'। आत्मज्ञानमविद्याया भिन्नमस्तीत्येतदञ्जसैव ध्यानगतं भवति। परन्तु विद्यातोऽपि तत्परतोऽस्तीति तु विशिष्टरूपेणैव ज्ञातव्यं भवति। एतदर्थं एव 'एव' शब्दस्य प्रयोगः।

॥ ११ ॥

विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥

अर्थः— विद्ययाऽविद्यया च सह तदात्मतत्त्वं ये नाम जानीयुः, ते तस्यैवाऽत्मतत्त्वस्य साहाय्येनाऽविद्यया मृत्युमुल्लङ्घ्य विद्ययाऽमृतं प्राप्नुवन्ति।

(११३) अत्रैवं दृश्यते— विद्याया अविद्यायाश्च समुच्चयेनाऽत्रोपदेशो विहितः। परं तत्खलु केवलं भाषामात्रम्। यत्र द्वे अपि साधने समर्थे भवतः, तयोर्योगात्काचिद्विशिष्टा निष्पत्तिश्च भवति, तत्र स समुच्चयः कथ्यते। परमत्र द्वे (विद्याविद्ये) न केवलं पृथक् समर्थेऽपित्वनर्थकारिण्यावपि स्तः। अतस्ते एकमेव साधनं भवतः। नैव तयोः समुच्चयः सिद्धो भवति।

(११४) 'विद्यामविद्यां च द्वे एव पृथग्भूते दोषपूर्णे च मत्वा द्वयोर्योगः आवश्यकोऽस्ति'— एतत्त्वत्र कथनीयमेवाऽस्ति। परमेतदतिरिक्तम् किञ्चन तृतीयं वस्तु प्रति, अर्थादात्मतत्त्वं प्रति ध्यानमाकर्षणीयमस्ति। तृतीयवस्तुनस्तस्य साहाय्येन द्वयोर्योगः सफलो भवति।

(११५) आत्मज्ञानमभि यदि दृष्टिर्भवेत्तर्हि मनुष्योऽविद्यासाहाय्येनाऽनेकैर्व्यर्थज्ञानैरस्पृष्टः, अर्थादनात्मविषयतो बुद्धिमपनीयाऽञ्जसैव 'आवृत्तचक्षुः' भवेत्। एतदेव हि मृत्योस्तरणम् नाम! किञ्च - विद्यायाः साहाय्येन स आत्मचिन्तनं कृत्वाऽक्षयस्याऽमृतस्य निधिं प्राप्नोति। विद्याऽविद्या च यद्येवमात्मज्ञानार्थमुपयुज्येयातां, तर्हि द्वे एव ते उपकारिके साधनरूपे च भवतः।

(११६) मृत्योस्तरणममृतस्य प्राप्तिश्चैते द्वे एकस्यैव फलस्य निवृत्तप्रवृत्तरूपे अङ्गे स्तः। नद्यास्तरणं कर्तव्यम्, [ततः] पारेनदि प्राप्य अन्यतरतटवर्तिनां फलानामास्वादश्च कर्तव्यः— अयमेव हि पूर्णः कार्यक्रमः।

(११७) श्वेताश्वतर एकं वाक्यमाम्नातम्— 'क्षरं त्वविद्या ह्यमृतं तु विद्या। विद्याविद्ये ईशते यस्तु सोऽन्यः' (श्वेता० ५।१) दशमस्य मन्त्रस्य वाक्यरचनां स्पष्टयितुमस्य वाक्यस्योत्तरार्धम् प्रथममस्माभिर्दृष्टम् (टिप्पणी १०८)। तस्य पूर्वार्धेऽविद्या 'क्षर' इति कथिता, विद्या 'अमृतम्' इति। तस्य कोऽर्थो बुध्येत ?। 'अविद्या क्षरकला, विद्याऽमृतकला' इत्येवं भवति तस्य वाक्यस्यार्थः। अविद्याया नकाररूपत्वात्तस्याः फलस्यापि नकाररूपत्वेन (क्षरम्) पातनशीलं भवति। अर्थात्तस्मिन्नाधारितेन सता (साधकेन) आप्राप्तेर्भावरूपस्य फलस्य नैरन्तर्येण प्रयतितव्यम्। अयं सङ्केतस्ततो ग्रहणीयः।

(११८) मनोर्निम्नश्लोकोऽस्य मन्त्रस्य समानार्थकः कथ्यते—

ततो विद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते॥

वस्तुतोऽस्मिन्मन्त्रे प्रस्तुते मन्त्रे च तात्पर्यैक्यं नाऽस्ति। मनुस्तपो विद्यां च द्वे एव निःश्रेयसकरे समर्थसाधनरूपे चाऽमन्यत। अत्र तु केवला विद्या, तथा केवलाऽविद्या च द्वे एव गाढान्धकाररूपे कथिते। अतो वयमविद्याया अर्थं नैव तपो वक्तुं शक्नुमः। किञ्चैवमर्थस्त्वविद्याशब्दस्य लाक्षणिक इव भवेत्। श्रुत्यर्थो (वाच्यार्थः) यत्र संगतो भवति तत्र नैव लक्षणार्थः समुचितो भवति।

(११९) एवमप्येकोऽर्थः क्रियते— अविद्या नाम कर्मेति। परम् तदपि नैवोचितम्। 'कर्म नाम गाढोऽन्धकारः' इति कल्पना नास्ति 'ईशावास्यो' पनिषदि। वरं तद्विपरीताऽस्ति कल्पना। द्वितीयतृतीयमन्त्रयोर्युगपत्पठनादेवैतदवगतं भवति। एतदतिरिक्तम्,— कर्मैवाऽविद्याया अर्थो भवेदिति तु नैव निश्चयतोऽपि श्रुतिसंमतं भवेत्।

(१२०) ज्ञानकर्मसमुच्चयलोभेनाऽत्र विद्याया अर्थ आत्मज्ञानमित्यपि व्यधीयत। नैतद् ध्यातुं शक्यते, यत्— बलवदाकृष्टायामपि कल्पनाशक्तौ कथङ्कारमात्मज्ञानं कथयितुं शक्येत गाढान्धकार इति, अथ पुनरविद्यातोऽप्यधिक इति च। वस्तुतः सरलोऽन्वयार्थस्त्वेतदेवाऽचष्टे, यत्— आत्मज्ञानस्य सर्वोच्चं महिमानं व्यञ्जयितुमेव ह्येते मन्त्राः सन्ति।

॥ १२ ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्यां रताः ॥

अर्थः– ये निरोधे निमग्नास्ते गाढेऽन्धकारे प्रविष्टाः । ये च विकासे रताः, मन्ये– ते तु ततोऽपि निविडेऽन्धकारे प्रविष्टाः ।

(१२१) अतः पूर्वैस्त्रिभिः श्लोकैर्बुद्धिशोधनं जातम्, अथेतो हृदयशोधनं क्रियते ।

(१२२) असद्वृत्तीनां निरोधः, सद्वृत्तीनां विकासश्च द्वावप्येतौ हृदयशोधनस्यैकस्य निवृत्तप्रवृत्तरूपे अङ्गे स्तः । तदनुसारतस्तयोः फले अपि निवृत्तप्रवृत्तरूपे प्रदर्शिते ।

(१२३) अत्र ' संभूति ', ' असंभूति ' इति शब्दयोरर्थविषये नाऽस्त्यैकमत्यम्, नचाऽप्याशास्यतेऽग्रतो गत्वाऽपि तद् भविष्यतीति । अत्राऽस्याऽर्थनिश्चयसंबन्धे वैदिकसाहित्यस्य साक्षित्वं यथासंभवमुरीकृतम्, एतावदेव कथयितुं पार्यते ।

(१२४) विधायिकायाः विकासदृष्टेरभावे केवलं निरोधरूपा निषेधिका साधना स्वयमस्मास्वपि प्रतिकूलत्वेन संगच्छते । निरोधाय यासामेव सात्रेडं नामग्रहो विधीयते, ता एव अशुभा वृत्तयो दृढीभवितुमुपक्रमन्ते , अयमेव हि निरोधगतो गाढान्धकारः । अन्यतो निरोधशून्यस्य केवलविकासस्य कल्पनायाः (कारणात्) मन्ये— ततोऽपि घोरान्धकारोत्पत्तेः संभावना भवति । गुणविकासस्य नाम्नि मनुष्योऽजानान एव नैकविधैर्विषयपाशैर्नियन्त्र्यते । उभयतः संभावितस्याऽन्धकारस्य केवलं दिङ्मात्रं (प्रतिरूपम्) दर्शितम् । आत्मज्ञानविहीनायामैकान्तिक्यां बौद्धिकसाधनायामिवाऽऽत्मज्ञानविहीनायामैकान्तिक्यां हार्दिकसाधनायामपि नानाविधोऽन्धकारः परिपूरितो भवति । यो यस्याऽस्ति, स एव तमन्वेषयतु ! तदेभ्यः सर्वेभ्य आत्मानं गोप्तुमात्मज्ञानं ह्यावश्यकम् ।

॥ १३ ॥

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां ये नस् तद् विचचक्षिरे ॥

अर्थः– आत्मतत्त्व विकासाद् भिन्नम् अस्ति, निरोधाच्चेति कथितम्। येऽस्मान् तत् साक्षात्कारितवन्तः, तेभ्यो धीरेभ्यः पुरुषेभ्योऽस्माभिरेवमाकर्णितम्।

(१२५) आत्मतत्वम् निरोधाद्विकासाच्चोभयतोऽपि परतोऽस्तीति कथितम्। यतस्तन्ममैव स्वरूपमस्ति। अहं स्वस्यैव विकासं निरोधं वा कथङ्कारं कुर्याम्?

(१२६) 'अन्यदेवाहुः सम्भवात्'। आत्मज्ञानं निरोधतो भिन्नमस्तीत्येतत् स्वतो ध्यानगम्यं भवति। परन्तु विकासस्य परमा सीमैव ह्यात्मज्ञानमित्येवं कल्पनाया रूढत्वेन तद् विकासतः परतोऽस्ति। अतस्तदस्माभिर्विशेषरूपेण ज्ञातव्यमस्ति। एतत्प्रयोजन एवाऽत्र 'एव' कारप्रयोगः।

(१२७) 'संभूति' 'असंभूति' इत्यनयोः शब्दयोः स्थाने 'संभव' 'असंभव' शब्दयोः प्रयोगः केवलं छन्दःसौविध्यायाऽस्ति।

(१२८) आत्मज्ञानं हि भिन्नमेव वस्तु द्विविधाया बौद्धिकसाधनायाः, तथा द्विविधाया हार्दिकसाधनायाश्चेति ह्युपनिषद एवाऽऽख्यातुं शक्नुवन्ति। परं ता अपि पूर्वगुरूनेव व्यपदिशन्ति। अतो गुरुं विना नैव ज्ञानं भवतीति तात्पर्यं भवति।

(१२९) अस्मिन् मन्त्रे, अतः पूर्वस्मिन् दशमे मन्त्रे च गुरून् लक्ष्यीकृत्य 'धीर' शब्दस्य प्रयोगः कृतः। 'धी' शब्दतो धीर इति 'धीर' शब्दस्य बुद्धिमानिति चाऽर्थो भवति। धृधातोस्तु 'धीर' अर्थाद् धृतिमानित्यर्थो भवति। अतः पूर्वम् बुद्धिशोधनस्य प्रकरणत्वेन तत्र मुख्यतया प्रथमोऽर्थो लक्ष्यीकृतः। अत्र च हृदयशोधनस्य प्रकरणत्वेन मुख्यतया द्वितीयोऽर्थो लक्ष्यीकृतः। द्वयोरेव योगात् पूर्णा धीरता संपद्यते।

(१३०) 'इति शुश्रुम'। श्रुतिः, स्मृतिः, कृतिश्च— एषैव हि संक्षिप्तौपनिषदिकी ज्ञानप्रक्रिया। गुरुमुखाच्छ्रवणम्, सचिन्तनं तस्य पौनःपुन्येन स्मरणम्, तदनुसारम् कृत्वा तस्य प्रयोगश्च (परीक्षा)। 'उपनिषद्' शब्दस्य व्याख्यावसर एतां प्रक्रियां वयं प्राक् दृष्टवन्त एव।

(१३१) 'विचचक्षिरे'—अर्थाद् व्याख्यां कृत्वा उक्तवन्तः, प्रबोधितवन्तः – एवमर्थः क्रियते। एतद्युक्तमेव। परं 'विचचक्षिरे' इत्यत्र 'चक्ष' धातोः कारणात् तस्य चक्षुषा संबन्धाच्च 'दर्शनं कारितवन्तः' इत्यर्थोऽस्याऽभिप्रेतो भवति। शिष्यस्य ज्ञानसाक्षात्कारो हि गुरोः कार्यम्। यावद् ज्ञानस्य नाऽनुभवे परिणतिः, तावन्नैवाऽस्ति तस्य साफल्यम्।

संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥

अर्थः-विकासेन निरोधेन च समम ये तत् आत्मतत्वम् विदन्ति, ते तस्य (आत्मतत्त्वस्य) साहाय्येन निरोधतो मृत्युं तीर्त्वा विकासतोऽमृतं प्राप्नुवन्ति ।

(१३२) अस्मिन् मन्त्रे 'असंभूति' शब्दस्य तात्पर्याय 'विनाश' इत्यसावपरः पर्यायः प्रयुक्तोऽस्ति । तत्राऽयं हेतुः— दोषनिवृत्तेरथवा निरोधस्य द्वौ भागौ भवतः— (१) नवानां दोषाणां प्रवेशनिषेधः । (२) प्राक् प्रसक्तानां दोषाणां च बहिष्कारः । 'असंभूति' शब्दोऽक्षरार्थतो मुख्यतया प्रथमं भागं सूचयति । द्वितीयं भागं च सूचयितुं 'विनाश' शब्दः प्रयुक्तः । योगशास्त्रम निरोधशब्दे द्वौ भागौ समावेशयति ।

(१३३) 'अत्रत्यः 'विनाश' शब्दोऽविद्याया अपि द्वौ भागौ सूचयति— (१) व्यर्थानां ज्ञानानां भारस्याऽग्रहणम् (२) पूर्वगृहीतानां च तेषां विस्मृतिः ।

(१३४) यदाऽऽत्मज्ञानोत्कण्ठा भवति, तदा मनुष्यो निरोध-बलेन विषयवशीकार-रूपम् वैराग्यं प्राप्तं करोति । तथा संपन्ने सत्येवं वक्तुं शक्यते— 'साधको मृत्युं तीर्णवान्' । अग्रतो विकासबलेनौतप्रोतं विश्वप्रेम कृत्वाऽक्षयममृतनिधिं प्राप्तं करोति (साधकः) । निरोधविकासयोरेवमात्मज्ञानस्य हेतुभावेन परिकल्पनायां द्वावपि तावुपकारकौ साधनरूपौ च भवतः ।

(१३५) अतः पूर्वम् यथा (१०९) टिप्पण्यां कथितम्, तथाऽत्राऽपि समुच्चयो नाऽभिप्रेतः । सैव हि साधनाऽत्राऽभिप्रेता । योभयदोषरहिता, उभयगुणसंपन्ना, एकैवाऽव्यङ्गा, परिपूर्णा चाऽस्ति ।

(१३६) माध्यन्दिनपाठे द्वादशस्य मन्त्रस्य चतुर्दशान्मन्त्रात् पूर्वम् तथा नवमस्य मन्त्रस्य चैकादशान्मन्त्रादनन्तरं पाठोऽस्ति । प्रथमं बुद्धिशोधनमुत हृदयशोधनम् ? द्वयोस्तयोः कतरदधिकमहत्त्वकम् ? एवं वादोपक्रमो निरर्थकः, अस्य विषयस्य तु साधक-मनोभूमिकायामेवाऽधारितत्वात् । वस्तुतो द्वयमपि तत्समानं महत्त्व बिभर्ति, युगपत्साधनीयतां च । तथात्वेऽपि यदि विवेचनोपन्यासः क्रियते, तर्हि प्रथम बुद्धिशोधनम्, तदनु हृदयशोधन-

मित्येष एव क्रमोऽपेक्षाकृतमौचित्यं बिभर्ति। गीतयाऽपि सांख्यबुद्धेराधार एवाऽग्रतो योगबुद्ध रचना कृताऽस्ति।

(१३७) एतदन्तमन्धकारस्य त्रयः प्रकाराः निर्दिष्टाः। तेषामेकत्र संकलनमुचितं भविष्यति —

(१) क्रियागतोऽन्धकारः (मन्त्रः ३) —
आत्मघातकमासुरमाचरणम्।
(२) बुद्धिगतोऽन्धकारः (मन्त्रः ९) —
[अ] केवलाऽविद्या, [आ] केवला विद्या।
(३) हृदयगतोऽन्धकारः (मन्त्रः १२) —
[अ] केवलो निरोधः, [आ] केवलो विकासः।

एतेषु नैतिकोऽन्धकारस्तु सर्वथा वर्ज्योऽस्ति। बौद्धिकस्तथा हार्दिकोऽन्धकारः संशोध्यौ स्तः। संशोधने कृते तौ साधनरूपौ भवितुं शक्नुतः।

(१३८) "परमेतत्संशोधनं कुतः करिष्यते?।" उत्तरम् — "आत्मज्ञानतः"। किन्त्वात्मज्ञानार्थमेव ह्येतत्संशोधनम्। साधनशुद्धित आत्मज्ञानम्, आत्मज्ञानतः साधनशुद्धिरिति प्रहेलिका कथं समाधीयेत?। एतदर्थमितः प्रार्थनातत्त्वस्याऽर्थादीश्वरभक्तेरावाहनं क्रियत आगामिनि मन्त्रे।

॥ १५ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितम् मुखम्।
तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥

अर्थः— सुवर्णमयपात्रेण सत्यस्य मुखं पिहितं भवति। हे विश्वपोषक प्रभो, सत्यधर्मोपासकस्य दर्शनार्थिनो मम कृते तत् त्वमुद्घाटय।

(१३९) आत्मा सत्यकामः सत्यसङ्कल्पश्च भवति, स एव हि सत्यस्वरूपः, शिवस्वरूपश्च। तर्हि सर्वेषामेवमनुभवः किं न भवति? तत्रोपनिषद उत्तरयन्ति — **"त इमे सत्याः कामा अनृतापिधानाः"** अर्थादात्मनः सत्यकामताऽनृतेनाऽच्छादिता भवति (छां ८।३।१)। तदेवाऽवरणम् दूरीकर्तुमियं प्रार्थना कृताऽस्ति।

(१४०) अनृतं वाऽसत्यम् स्वस्य नग्नेन रूपेण मनुष्यानाकर्ष्टुं नाऽलम् । अतस्तदनेकेषां रमणीयभागानां प्रसङ्गवशात् 'हित' रूपेण भासमानानां कर्तव्यानां च रूपं धारयति । तस्यैव हि नाम हिरण्मयपात्रमथवा सौवर्णमावरणमिति । हिरण्मयम् = हितम् + रमणीयम् ।

(१४१) 'हिरण्मयपात्र' शब्दः स्पष्टतया लाक्षणिकोऽस्ति । तथाऽप्यक्षरार्थ-तोऽयं वित्तमोहस्य सूचकोऽस्ति । नच तद्विस्मर्तव्यम् (दृश्यताम प्रथमो मन्त्रः)—वित्तमोहेन सत्यदर्शनं लुप्यते, मनुष्यश्च प्रमाद्यति !

'प्रमाद्यन्तं वित्तमोहेन मूढम्' (कठ २-६)

(१४२) किमर्थं वित्तमोहो भवति मनुष्यस्य ? वित्तात् पोषणस्याऽपेक्षा भवति । परन्तु परमार्थतः पोषकं तत्वं त्वन्यदेवाऽस्ति । तदेव प्रबोधयितुं 'पूषन्' शब्दस्य योजनाऽस्ति ।

(१४३) 'हिरण्मयपात्रम्'— गीताया भाषायाम् 'योगमाया' । ईश्वरो योगमाययाऽऽवृतोऽस्ति । अतस्तस्य दर्शनं लुप्तमभवत् । (गीता ७।२५) तस्य मायाया निराकरणं तस्यैवाऽश्रयतो भविता । (गी० ७।१४) अत इयं प्रार्थनाऽस्ति ।

(१४४) सत्यं पिदधतः सुवर्णावरणस्याऽपाकरणायाऽत्र विश्वपोषकः परमेश्वरः प्रार्थितः । कोऽसौ पुनः सत्याद् भिन्नः परमेश्वरः, ? न परमेश्वरः सत्याद् भिन्नोऽस्ति । सत्यमेव हि सः । सत्यस्य दर्शनाय सत्यस्यैव हीयं प्रार्थना कृता । "**सत्यं ज्ञानमनन्तं ब्रह्म**" (तै० २।१) ।

(१४५) ईश्वरं सत्यं वदाम, अथवा सत्यमीश्वरम् ? द्वयमपि एकतात्पर्यमेव । एका तत्वज्ञानस्य भाषाऽन्या साधनायाः ।

(१४६) ईश्वरस्य गुणा अनन्ताः सन्ति । साधकाः स्वरुचेरावश्यकतायाश्चाऽनु-सारेण तस्य विशिष्टानि गुणरूपाणि संमानयन्ति । साधकानां सर्वेषामप्येतासां शाखानां स्थूलरूपेण द्वौ वर्गौ भवतः — एका निर्गुणा शाखा, येश्वरं सत्येनाऽथवा सत्यपर्यायाभी रूपसंज्ञाभिः संबोधयति । अपरा सगुणशाखा, यस्यै प्रेम, अथवा प्रेमपर्याया रूपसंज्ञा रोचन्ते । दार्शनिकप्रवृत्तयो विचारकाः प्रथमे वर्गे गण्यन्ते । उपासनापथिकानां गणना द्वितीये वर्गे भवति । उपनिषद्भिः स्वयं दार्शनिकप्रवत्तिमत्त्वाद् व्याख्यासमये '**सत्यं ब्रह्म**' एवं व्याख्या कृताऽस्ति । परमुपासनामन्तरेण दर्शनं न भवतीत्यप्यस्ति सिद्धान्त उपनिष-दाम् । अत उपासनार्थे वयं '**प्रियं ब्रह्म**' अर्थात्प्रेमसमयस्वरूपमुपास्महीत्यपि ताभि-

रुक्तमस्ति (बृ० ४।१।३। तथा १। ४।-८।)। तात्त्विकविचारे क्रियमाणेऽन्ततः 'सत्य' शब्द एव स्थिरीभवितुं शक्नोति। यतः सत्यमस्ति निर्विकारम्। प्रेम द्विविधमेव भवितुं शक्नोति— सविकारं निर्विकारञ्च। परं विकारवतो मनुष्यस्य निर्विकारतां प्रति नयनायेश्वरस्य प्रेममयं स्वरूपं सेतूयते। तदनुसारमस्योपयोगो याज्ञवल्क्यमैत्रेयीसंवादे दर्शितश्च। व्यापकदृशेक्षिते सत्यं साधनं, प्रेम च तत्प्राप्तिसाधनमिति भवति निष्कर्षोऽस्य।

(१४७) सत्यरूपः परमेश्वरः 'पूषन्' अर्थाद् विश्वपोषक इत्युक्तोऽस्ति। यतः सत्यात् पोषणम्, अनृताच्च शोषणं भवतः। "समूलो वै एष परिशुष्यति, यो अनृतम् अभिवदति"– (प्रश्न० ६। १)।

(१४८) 'पूषन्' इति, अर्थात् 'विश्वपोषक' इति सत्यस्याऽभिधानात् प्रस्तुतमन्त्रेण सत्यप्रेम्णोरन्तरस्थो भेद एव निर्मूलितः। संपूर्णसमाजस्य प्रेमपूर्णया परिचर्यावृत्या पोषकस्य शूद्रस्याऽभिधानं 'पूषन्निति' कृतमुपनिषद्भिः। एवं प्रेमपूर्णायाः सेवावृत्या आदर्शरूपा भूमाताऽप्युदाहृता, 'पूषन्' इत्यभिधानेन योजिता च— "इयं वै पूषा। इयं हि इदं सर्वं पुष्यति, यत् इदं किञ्च" (बृ० १।४।१३)। पूषन्नित्यस्याऽधिकं विवरणमागामिनि मन्त्र आयाति। सत्यप्रेम्णोः समन्वयवृत्तेः कारणादेव हि षष्ठसप्तममन्त्रौ पृथक् पठनीयौ जातौ। अन्यथा द्वयोरेकेनाऽपि सता कार्यं निरपत्स्यत।

(१४९) 'तत् त्वम् अपावृणु'— तत् आवरणम् त्वं दूरय। अथवा तत् (सत्यस्य मुखम्) त्वं प्रकटय। एवं प्रकारद्वयेनैव रचना संभवति। फलितं चैकमेव।

(१५०) सत्यधर्मशब्दः पुराणेन (सत्यधर्मन् इति) स्वरूपेण ऋग्वेदे चतुष्पञ्चवारानुल्लिखितोऽस्ति। तथा सर्वत्र स बहुव्रीहिसमासयुक्तश्चाऽस्ति। अतः 'सत्यस्योपासना धर्मो यस्य सः, एवमस्याऽर्थः कर्तव्यः।

(१५१) 'धारयिता' इत्यस्मिन्नर्थे धर्मशब्दो यथा नीतिधर्मस्य वाचको भवति, तथेश्वरस्याऽपि वाचको भवति। "एष सर्वेश्वरः, एष सेतुर्विधरणः, एषां लोकानामसंभेदाय"— असौ सर्वेश्वरो लोकस्याऽसंभेदाय विधरणरूपः सेतुरस्ति (बृ० ४। ४। २२)। धर्मशब्दस्य द्वावर्थावीश्वरनीतिधर्मौ ध्यात्वा 'सत्यधर्म' शब्दस्याऽपि द्वावर्थौ स्मर्तव्यौ।

(१५२) सत्यस्यैव हि नीतिधर्माणामाधारत्वात् सत्ये सर्वेषामेव नीतिधर्माणां सारः समाविशति। ऋतेऽस्मात् सः (नीतिधर्मः) स्वतन्त्रो धर्मोऽप्यस्ति। स प्रथमः, अन्तिमः, परमः, पूर्णश्चास्ति। सत्यस्य विरुद्धं यदुपस्थास्यति, तत् स्वतोऽसत्यं, निराधारं च सिद्धं भविष्यति। '**यो वै स धर्म्मः, सत्यं वै तत्**'– (बृ० १।४।१४)।

(१५३) दर्शनाय सत्यमात्मा भवति।
प्रार्थनायै सत्यमीश्वरो भवति।
आचरणाय सत्यम् धर्मो भवति।

(१५४) अस्य मन्त्रस्य प्रार्थना वैदिकधर्मस्य सार्वभौमप्रार्थनाऽस्ति। तत एवाऽस्माकमागामिनां त्रयाणां मन्त्राणां ध्यानत्रयी संपादनीयाऽस्ति।

॥ १६ ॥

पूषन्नेकर्षे यम सूर्य
प्राजापत्य व्यूह रश्मीन् समूह।
तेजो यत् ते रूपं कल्याणतमं, तत्ते पश्यामि
योऽसावसौ पुरुषः सोऽहमस्मि॥

अर्थः– त्वमस्य विश्वस्य पोषकोऽसि, एको निरीक्षकश्च। त्वं नियमनकर्ता, प्रवर्तनकर्ता चाऽसि। त्वं सर्वस्य प्रजावत् पालकोऽसि। त्वमात्मीयान् पोषकान् रश्मीनुद्घाट्य, एकत्रकृत्य दर्शय। तव तदोजस्वि, परमकल्याणमयं च रूपमितोऽहं पश्यन्नस्मि। परात्परो यः पुरुषोऽस्ति, सोऽहमस्मि।

(१५५) अत्र सूर्यप्रतीक ईश्वरस्य ध्यानमस्ति। योऽन्तर्यामी सूर्यस्य प्रेरकोऽस्ति, स एव मम बुद्धेश्च प्रेरकोऽस्ति। 'सत्यम्' तस्य नाम। सूर्यो बुद्धिश्च सुवर्णावरणरूपौ स्मर्तव्यौ।

(१५६) मन्त्रस्याऽदिमचरणद्वयेन प्रार्थना समाप्ता । '**रश्मीन् व्यूह, रश्मीन् समूह**' — इति द्विरावृत्तं प्रार्थनावाक्यम् । 'तदनु भक्तस्य प्रार्थनां श्रुत्वेश्वरस्तस्मै दर्शनमददात्,' — एतदस्माभिर्मन्तव्यम् । तृतीयचरणेऽस्य दर्शनस्य वर्णनमस्ति । 'तेजः' इति 'रूपम' इत्यस्य विशेषणवत् समानाधिकरणमस्ति । चतुर्थे चरणे दर्शनाद् या प्रतीतिर्जाता, सा दर्शिता ।

(१५७) अस्मिन्मन्त्रे परिपूर्णं ध्यानं समक्षमुपस्थापितमस्ति । प्रार्थनया, दर्शनेन, प्रतीत्या चैतैः संमिलितैर्ध्यानं पूर्णं भवति । यावद दर्शनं नोपपद्यते, तावद् दर्शनस्य स्थाने भावनां, प्रतीत्याः स्थाने च प्रीतिं संस्थाप्य ध्यानं पूरयितव्यम् भवति ।

(१५८) '**एकर्षिः**' 'ऋष्' (अर्थान्निरीक्षणम्) एतस्मात् 'ऋषि' शब्दो निष्पन्नोऽस्ति । एवमेको निरीक्षकोऽन्तर्यामी भगवानस्ति । अतः स एकर्षिः कथ्यते । निरीक्षणमीश्वरीयसत्ताया एकं महदेवाऽङ्गमस्ति । अस्य निरीक्षणस्याऽधिकार ईश्वरस्यैवाऽस्ति । परं शिष्यार्थे गुरुरीश्वरतुल्य एवाऽस्ति । अतस्तस्याऽप्ययमधिकारः स्वीकर्तुं शक्यते । अतो गुरुरपि 'एकर्षि' इति संज्ञातुं शक्यते । उपासनार्थं ईश्वरमाकाशस्थेन सूर्येण तथा गुरुम् पार्थिवेनाऽग्निनोपमाय 'एकर्षि' शब्द एवमग्निसूर्यार्थवाचकोऽपि भवति । प्रस्तुतमन्त्रे सूर्यध्यान-मस्ति । मुण्डकस्य [३ । २ । १०] मन्त्र अग्निध्यानमस्ति । संस्कृते केचन धातव एकतः सूक्ष्मार्थे ज्ञानवाचका अप्यन्यतः स्थूलार्थे गतिवाचका भवन्ति । एतदनुसारतः 'ऋष' धातोरर्थो गमनमपि भवति । एतौ द्वावर्थविकत्रकृत्य तयोरुपयोगश्चतुर्थमन्त्रस्य '**ऋर्षत्**' पदे विहितोऽस्ति ।

(१५९) '**यम**' — '**सूर्य**' — एते अन्योन्यपूरके द्वे कार्ये स्तः । न केवलं भक्तस्य निरीक्षणेनेश्वरो विरमति, प्रत्युताऽवश्यकताऽनुसारं तस्य नियमनमपि करोति, तम् प्रेरयति च । अशुभान्नियमनम्, शुभाय च प्रेरणा ! यमः अर्थात् नियामकः । 'सूर्यः' अर्थात् साधु प्रेरकः । (सु+ईर) सूर्य एव सूक्ष्मरूपेण 'सविता' इत्यपि कथ्यते । गायत्रीमन्त्रेऽस्यैव वरणीयस्वरूपं ध्यात्वा बुद्धचथ तस्मादुत्तमप्रेरणाऽपेक्षिताऽस्ति ।

(१६०) '**प्राजापत्य**' शब्दो राज्यस्य विरोध उपस्थापितोऽस्ति । तस्मादी-रीयराज्यस्य स्वरूपं प्रदर्श्यते । अर्थात्स धर्मवाचकः शब्दोऽस्ति । स एवाऽत्र धर्मबोधाय क्तोऽस्ति ।

(१६१) 'व्यूह - समूह' अथवा विश्लेषणसंश्लेषणयोर्योगादेव हि यत्किमपि दर्शनं पूर्णं भवति। परं भौतिकचिन्तने विशेषतो विश्लेषणं प्रधानतया सिद्धं भवति। तथैवाऽध्यात्मिकचिन्तने संश्लेषणम् (दृश्यताम् टिप्पणी ७२)।

(१६२) " पोषणम् + निरीक्षणम् + नियमनम् + प्रवर्तनम् + पालनम् "— एतदेव हीशत्वस्य विश्लेषणम्, तस्यैव संश्लेषणम् 'परमकल्याणम्'।

(१६३) 'तत् ते पश्यामि'—मन्ये एतद्वाक्यम् छन्दसो बाहीकमस्ति। अर्थान्नितरां मन्दस्वरेण मध्ये कथितम्।

(१६४) ईश्वरः "अशब्दम्, अस्पर्शम्, अरूपम्" (कठ० १।३।१५) इत्यादिप्रकारेण केवलमव्यक्तः कथितोऽस्ति। तर्हि तस्य रूपदर्शनं कथं स्यात्? एष प्रश्नोऽत्र संभवति। एतदेव प्रस्तुत्य ब्रह्मसूत्रैरेतस्योत्तरमेवं प्रदत्तमस्ति— "अपि च संराधने प्रत्यक्षाऽनुमानाभ्याम्" (ब्र०सू० ३।२।२४)। सूत्रस्यैकोऽर्थः— श्रुतीनां स्मृतीनां चाऽस्त्येष निर्णयो यत्— "ध्यानावस्थायामव्यक्तस्येश्वरस्याऽपि दर्शनं संभवति"। सूत्रस्य द्वितीयोऽर्थः—"ईश्वरस्य शब्दस्य श्रवणम्, रूपस्य दर्शनम्, स्पर्शस्याऽनुभव इत्यादिः सगुणः साक्षात्कारः कतिपयैर्भक्तैस्तन्मयावस्थायां प्रत्यक्षतोऽनुभूतः। अनुमान- (वैतर्किक) रीत्यैतत्संगतिरपि घटते"। तस्या वैतर्किकाऽनुमानपद्धत्या अल्पं दिग्दर्शनम् (५५) टिप्पण्यां कृतमस्ति।

(१६५) "योऽसावसौ पुरुषः सोऽहमस्मि"। अत्र द्वितीयः 'असौ' इति शब्दोऽवतरणाऽङ्कितोऽस्ति। स यः 'असौ' पुरुषः कथितोऽस्ति, 'अहमस्मि'— एषोऽस्त्यस्य वाक्यस्याऽर्थः। 'असौ' पुरुषः, अर्थाद् विप्रकृष्टः परात्परः पुरुषोऽर्थात्परमेश्वरः। योऽस्ति तस्मिन् पारे, स एव नितरामवारे— अर्थादहमेव सोऽस्मि।

(१६६) पुरुषशब्द आत्मवाचकतया प्रसिद्धोऽस्त्येव। स श्रुत्याऽनेकधा निरुक्तोऽस्ति। (१) 'तेन एष पूर्णः' स्वस्य पूरकशक्त्या यतो 'देहं पूरयति, तेन पुरुषः' (तै० २।५)। (२) 'पूर्व औषत्' अर्थात्प्रथममेव यो देहमदहत्, 'अतः' स 'पुरुषः' (बृ० १।४।१)। (३) 'पुरीतति शेते' (बृ० २।१।१९) अथवा 'पुरि शेते' (बृ० २।५।१८) अर्थाद् देहे, हृदयकन्दरायां वा यः शयानो भवति, अतः 'पुरुषः'। (४) 'पुर आविशत्'

(बृ० २।६।१८) देहे प्रविष्ट इत्यतः 'पुरुषः'। ऋतेऽस्मात् ' पूर्व अर्षत् " इति 'पुरुषः'— एतन्निर्वचनं तु प्रागेव जातम् (दृश्यताम् टिप्पणी ५८)। एतानि सर्वाणि निर्वचनान्युत्तमं भावं प्रदर्शयन्ति। परमस्मिन मन्त्रे ' पूषन् ' ' एकर्षे ' इत्यादिभिः पदैरीश्वरस्येश्वरीयता व्याख्याताऽस्ति। अतः एतदनुसारतोऽहं मन्ये— ' पुर ईष्टे, अर्थाद् देहेषु शासनं करोति, राज्यं करोतीति पुरुषः '— एतन्निर्वचनमत्र सूचितमथवा सूचनीयं भवति।

(१६७) विश्लेषणतः प्राप्ताः पोषणादयः पञ्च रश्मयः— एषा चिन्तनस्य प्रथमा भूमिका। संश्लेषणात्प्राप्तं कल्याणतमं तेजः— एषा दर्शनस्य द्वितीया भूमिका। ततोऽपि परतः '**योऽसौ असौ पुरुषः सोऽहमस्मि**'—एषा च समरसतायाः तृतीया भूमिका।

(१६८) '**सोऽहम्**'—इत्येतज्जपः, किमुताऽनुभवः ? अत्राऽयमनुभवरूपेण समुपस्थापितः। परं साधककृते स एव जपो भवति। अयं जपः सप्राणायामं कर्तव्यः। परमन्यसमयेऽपि सामान्येन श्वासप्रश्वासैः समं जपे न काचिदापत्तिः। योगशास्त्रे तत्प्रक्रिया सविस्तरं प्रत्ताऽस्ति। आत्माऽनुभवाऽनन्तरं तस्य जपरूपं प्रणश्यति, अखण्डजपरूपमाविर्भवति, यत् ' अजपा ' इत्यभिधीयते।

(१६९) '**सोऽहम्**' शब्देन कीदृशमैक्यं सूचितम् ?— प्रेमातिशयरूपम्, अङ्गाऽङ्गिभावरूपम्, अंशांऽशिरूपम्, साधर्म्यरूपमथवा तादात्म्यरूपम् ?— यादृशं कल्प्यते, तादृशमेव भविष्यति। अनुभूत्यैव गृह्यताम्! यद् वस्तु शब्दे न माति, तस्य शब्दे सीमितीकरणप्रयासात् केवलं वाद एव वर्धते, न तस्य बोधः।

(१७०) '**असौ पुरुषः**' अर्थात्प्रतीकरूपेण ' आदित्यपुरुषः '— अयमप्येकोऽर्थोऽस्ति। माध्यन्दिनपाठे स एवं गृहीतोऽस्ति। पञ्चदशस्य मन्त्रस्य पूर्वार्द्धम्, अस्य मन्त्रस्य भिन्नपाठमन्तिमं चरणं च गृहीत्वा माध्यन्दिनीयैरेवं पाठरचना कृताऽस्ति—

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
योऽसावादित्ये पुरुषः सोऽसावहम्॥

एष मन्त्रस्तस्याऽनुपूर्व्यामध्यायाऽन्ते पठितोऽस्ति। अस्मात पाठभेदात् ' असौ ' इति पुरुषशब्दस्य प्रतीकत्वप्रदर्शनादृते नाऽन्यत किञ्चिदधिकं प्राप्तं भवति। अत्राऽप्यादित्यशब्देन परमेश्वर एव लक्ष्यीकृतः। एतद बृहदारण्यकस्य निम्नप्रवचनतो ध्यानगतं भविष्यति—

"यः आदित्ये तिष्ठन्, आदित्यात् अन्तरः, यम् आदित्यः न वेद, यस्य आदित्यः शरीरम्, यः आदित्यम् अन्तरः यमयति, एष ते आत्मा अन्तर्यामी अमृतः (बृ० ३।७।९)

(१७१) 'सोऽहम्' सिद्धयनन्तरं सहजा मुक्त्यपेक्षा भवति। अतोऽग्रिममन्त्रे मुक्तेः प्रार्थनाऽस्ति। तत्र मुक्तेः स्वरूपं सूचितमस्ति, तदङ्गरूपाऽन्तकालिकी साधना च।

॥ १७ ॥

वायुरनिलममृतमथेदं भस्मान्त शरीरम्।
ॐ क्रतो स्मर, कृतं स्मर, क्रतो स्मर, कृतं स्मर ॥

अर्थः- एते प्राणास्तस्मिन् चैतन्यमयेऽमृततत्त्वे लीना भवन्तु, शरीरं च भस्मसाद्भवतु। हे दृढसङ्कल्पमय जीव! स्वनामोच्चारमीश्वरं स्मर। तच्चरितं स्मर। हे (मम) जीव! स्मर, (स्वं सङ्कल्पं त्यक्त्वा) तच्चरितं स्मर।

(१७२) अत्र प्रतीकरूपे वायावीश्वरस्य ध्यानमस्ति। योऽन्तर्यामी वायोश्चालकोऽस्ति, स एव मम प्राणानामपि चालकोऽस्ति, तस्यैव संज्ञाऽस्ति 'सत्यम्' इति। वायुः सुवर्णाऽवरणत्वेन स्मर्तव्यः, प्राणाश्च।

(१७३) वायुः (कर्ता), अनिलम् (कर्म)। (प्रतिपद्यतामिति क्रियापदमध्याहृतम्)। अस्यैकोऽर्थ एवं भवति— वायुः शरीरगतो वायुः (अर्थात् प्राणाः) निरन्तरं प्रवात्यनिलेऽर्थाद् ब्रह्माण्डगते वायौ मिलतु! अस्मिन्नर्थे एतद्वाक्यमुपलक्षणस्वरूपमस्ति। अर्थाच्छरीरस्य तानि सर्वाणि तत्त्वानि तन्मूलदेवतासु लीनानि भवन्तु— एवमस्याऽर्थो व्यापको भवति।

(१७४) '**वायुरनिलम्**' अस्य द्वितीयोऽर्थ एवं भवति — 'जीवश्चैतन्यमये परमात्मतत्त्वे मिलतु'। 'वायुः' अर्थाज्जीवनम्। अयमर्थः "वाति गच्छतीति वायुः" अनया व्युत्पत्त्या सूचितः। जीव उपाधियुक्तः सन् देहाद्देहान्तरं वासनाऽनुसारतो गच्छति। एवं स न गच्छेन्निरुपाधिकः सन् वर्तेत— इयमेवेच्छाऽत्र कृता।

(१७५) 'अनिल' शब्दः कम्पनार्थकात् 'अन्' धातोर्निष्पन्नः। सर्वास्वपि क्रियासु येन केनाऽपि प्रकारेण स्पन्दनं भवत्येव। अत एव 'अन्' धातुर्धातूनामपि धातुः कथनीयः। संस्कृते 'गमनम्' 'अशनम्' इत्यादिक्रियावाचकशब्दनिष्पत्तये यत् 'ल्युट्' प्रत्ययः क्रियते, अहं मन्ये— तत्सर्वम् 'अन्' धातोरेव रूपमस्ति। एवम् मूलभूतात् तथा व्यापकादस्मात् धातोरेव चैतन्यवाचकः 'अनिल' शब्दो निष्पन्नोऽस्ति। एतदतिरिक्तम् 'अन्' धातोः श्वसनादिवायुक्रियात्मको विशिष्टोऽर्थो भवति। 'प्राण' 'अपान' इत्यादि-शब्देषु स दृश्यते। यतः 'अनिलः' अर्थाद्वायुरित्ययम् विशिष्टोऽर्थो निरपद्यत। वयं दृष्टवन्तः— अस्मिन्मन्त्र एतौ द्वावेवाऽर्थावभिप्रेताविति।

(१७६) '**अमृतम्**' अयं शब्द एकादशे, चतुर्दशे च मन्त्रे प्रयुक्तोऽस्ति। तत्र स मोक्षवाचकोऽस्ति, अत्र चेश्वरार्थे प्रयुक्तः। द्वयोरर्थ एक एवाऽस्ति। मरणराहित्यम् चैतन्यस्य लक्षणमेव। सर्वस्मिन्नष्टेऽपि यदवशिष्यते, तदेव चैतन्यम्। बृहदारण्यके (१।३।२८) '**असतो मा सद् गमय**' '**तमसो मा ज्योतिर्गमय**' '**मृत्योर्मा अमृतं गमय**'— एते त्रयः सुप्रसिद्धाः प्रार्थनामन्त्रा अभ्यारोहार्थम् अर्थात् साधकस्योन्नत्यै जपनीयतयोक्ताः सन्ति। ईशावास्यस्य पञ्चदशषोडशसप्तदशमन्त्रेषु ते त्रयो यथाक्रमं सूचिताः सन्ति।

(१७७) '**भस्मान्तं शरीरम्**' (भूयात्) —अयमस्ति दाहविधेरु-ल्लेखः। दाहसंस्काराऽभिलाषो वैदिकधर्मस्यैकं वैशिष्ट्यमस्ति। 'शरीरस्य स्मरणं येन केनाऽपि प्रकारेणाऽवशिष्येत'— एवं प्रयत्नः सर्वैर्यथाशक्यं क्रियते। एतद्विपरीतम्— 'यथासंभवं तत् (शरीरम्) निःशेषतया लुप्तमेव भवतु' इति तु वैदिकसाधकानामेव पवित्रा भावव्याकुलता !

'माझें नामरूप लोपो, असतेपण हारपो'

अर्थात्-- 'मम नामरूपे लुप्ते भवताम्, अस्तित्वं च लुप्यताम्'

—ज्ञानदेवः

(१७८) '**अथ इदं भस्मान्तं शरीरम्**'— अत्रत्योऽथशब्दः सार-पूर्णोऽस्ति। 'अथ' अर्थादनन्तरम्। प्रथमं जीवः परमात्मनि विलीनो भवतु। तदनु शरीरं भस्मसाद् भवतु। अन्यथा जीवभावस्याऽप्यस्तित्वाऽवशेषाद् वृथा दाहविधेर्नाटकेन को लाभो भवेत्? जीवभावोऽपि नश्यतु, पुनस्तद्वृत्तान्तस्य स्मारकतया शरीरमपि भस्मसाद्भ-

वतु । प्रथमं विजयः, अनन्तरं विजयोत्सवः । मानवशरीरं हि मोक्षाय । स्वमुद्देश्यं पूरयित्वैव तद् दहनाऽधिकारि भवितुं शक्नोति ।

(१७९) शरीरशब्दस्य व्युत्पत्तिः ' शॄ ' (अर्थात विशरणम्) ' श्रि ' (अर्थात् आश्रयः)—इति द्वाभ्यां धातुभ्यां कर्तुं शक्यते । ' शरीरम् विशरणशीलम्, भङ्गुरमस्ति '—एतत् ध्यात्वा तद्विषयेऽस्माभिरासक्तिर्नो वर्धनीया । तथा तत् (शरीरम्) साधनाया आश्रयस्थानमस्तीति स्मृत्वा (तत् शरीरम्) यथाप्राप्तेन भोगेन योजनीयमिति चैवं द्विगुणमर्थं शरीरशब्दो बोधयन्नस्ति । संक्षेपे— ' तेन त्यक्तेन भुञ्जीथाः ' ।

(१८०) ॐ इतीश्वरनाम । त्रया वेदा मथिताः— ततोऽयं सारो निःसृतः । एवमेवोपनिषत्स्वस्य वर्णनमस्ति [छा० २। २३। ३] । प्रायः सर्वासूपनिषत्सु विविधैः प्रकारैरस्य वर्णनमस्ति । नवं माण्डूक्यं तु ॐकारस्य व्याख्यार्थमेव समर्पितमस्ति । योगसूत्रैर्जपनीयतया ॐकार एव स्मारितोऽस्ति । वेदाः स्वयं कथयन्ति— ' तस्य [ॐकारस्य] ज्ञानेन सर्वो वेदाभ्यासः सफलः, तद्विना च निष्फल इति । '

ऋचो अक्षरे परमे व्योमन् ।
यस्तन्न वेद किम् ऋचा करिष्यति ॥ —ऋग्वेदः

(१८१) दशमस्य मन्त्रस्य 'तत्', पञ्चदशस्य मन्त्रस्य 'सत्यम्', प्रस्तुतमन्त्रस्य 'ॐ' चैतानि त्रीण्येवेश्वरस्य नामानि । एतानीश्वरीयस्वरूपस्य त्रीन् पक्षान् व्यञ्जयन्ति – **'ॐ'** एतत् शुभाऽशुभे द्वे एवाऽऽत्मसात्करोति, **' तत् '** शुभादशुभाच्च परं, **' सत्यम् '** अथवा **' सत् '** केवलं शुभमिति च । एतत् त्रयमेकत्रकृत्य गीतया ' ॐ तत् सत ' इति ब्रम्हनिर्देशस्य योजना कृताऽस्ति । ❀

(१८२) जीवद्वारा जन्मजन्मान्तरेष्वनेके शुभाऽशुभसङ्कल्पाः कृताः । ' ते सर्वे विस्मार्यन्ताम् '—- एवमन्तिमप्रार्थनया [हेतुना] शुभाऽशुभस्य सर्वस्य (क्रियाकलापस्य) स्वस्मिन्नन्तर्भावसामर्थ्यं दधतः ॐ कारस्य स्मरणमत्रोचितमेव कृतम् ।

(१८३) ' क्रतु '– (सङ्कल्पः) शब्देनाऽत्र जीवः संबोधितः । जीवस्वरूपस्यैतन्नितरां याथातथ्यपूर्णं धार्मिकं च वर्णनमस्ति । सङ्कल्प एव हि जीवः । निःसङ्कल्पस्तु शिवः । सङ्कल्परहितो भाव एव हि साधना ।

❀ अस्य विवरणं दृश्यताम् ' स्थितप्रज्ञदर्शनस्य ' सप्तदशे व्याख्याने ।

(१८४) 'क्रतु' शब्दो वेदेषु पौनःपुन्येन प्रयुज्यते । सामान्यतया तस्याऽर्थः सङ्कल्पा भवति । परं 'सङ्कल्पे' 'क्रतौ' च सूक्ष्मो भेदोऽस्ति । 'क्रतु' शब्दः कृधातोर्निष्पन्नत्वात्कर्मसङ्कल्पार्थोऽर्थो भवति । '**यत् क्रतुर्भवति तत् कर्म कुरुते**' (बृ० ४।४।५) अस्मिन्वाक्ये क्रतोः कर्मणश्च संबन्ध आख्यातोऽस्ति संयोज्य । साधारणाः सङ्कल्पा उत्पद्यन्ते,विलीयन्ते च । परं यं सङ्कल्पमनुसृत्य मनुष्यः कामपि कृतिं प्रारभेत, सा 'क्रतुः' । 'ऐतरेयो' पनिषदि प्रज्ञाया विश्लेषणमनेकवृत्तिरूपेषु कृतमस्ति । तत्र सङ्कल्पात्क्रतोर्भिन्नो निर्देशः प्राप्तो भवति । 'तत्राऽयं सूक्ष्मो भेदोऽभिप्रेतोऽस्ति (ऐतरेय ३।५।२)। लौकिकभाषायां 'क्रतु' शब्दो दृढसङ्कल्पमथवा कृतसङ्कल्पं बोधयति ।

(१८५) '**ओ३म् क्रतो स्मर, कृतं स्मर**' । अस्याऽर्थः–'हे सङ्कल्परूप जीव ! त्वं स्वचरितं स्मर'–– एवं क्रियते । मयाऽपि प्रथममेवं कृत आसीत् । परं स प्रकरणाऽनुसारी न भवति । अत्र तु जीवदशाया लोपोऽभीष्टोऽस्ति । अतोऽत्रेश्वरस्य चरित्रमेव स्मरणीयतया भाति । ईश्वरस्य मङ्गलचरित्रं गतमन्त्रे विवृतमेव ।

(१८६) 'कृतं स्मर' इत्यत्र 'कृतम्' शब्दस्य नामानि, रूपाणि, गुणाः, कर्माणि च सर्वाण्येव लक्ष्याणि सन्ति । ईश्वरस्य कृतिं, तस्य महोपकारं च स्मराम । तस्य नामानि, रूपाणि, गुणांश्च गायाम । स्वं सङ्कल्पं तस्मिन् विलीनीकृत्य देहसत्तां विस्मराम । मनुष्यस्य कृते किमन्यदितोऽधिकं कल्याणकृद् भवितुं शक्नोति !

(१८७) एतत्समानविचारः श्लोकः —

ओ३म् इत्येकाऽक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥

(गीता ८। १३)

(१८८) अस्य मन्त्रस्य चतुर्थचरणस्थाने "क्लिबे स्मर, कृतं स्मर" इत्यपि पाठोऽन्योऽस्ति । तस्याऽर्थः– 'सङ्कल्पोच्छेदायेश्वरकृतं स्मरेति' । अर्थादत्रेश्वरस्मरणस्य हेतुः स्पष्टीकृतोऽस्ति । 'क्लिब्' एतत्कृदन्तं नाम 'क्लिप्' [अर्थाच्छेदनम्] इति प्राचीनधातोर्निष्पन्नम् । एष एव धातुराङ्ग्लभाषायामायातः । यः केशनखादीनां कर्तनार्थे तत्र प्रयुक्तो भवति । अर्वाचीनसंस्कृते 'क्लृप्' इति चाऽस्यैव धातो रूपमायातम् । '**क्लृप्तकेशनखश्मश्रुः**' इति मनुस्मृतेर्वचनेऽस्य प्रयोगः कर्तनार्थे लभ्यते । 'क्लिबे स्मर' इत्यादिपाठभेदेन 'कृतं स्मर' इत्यस्याऽर्थ ईश्वरकृतस्य स्मरणीयता भवति, नतु जीवकृतस्येत्येतदधिकं स्पष्टं भवति ।

(१८९) अन्तकाल ईश्वरस्मरणस्य नितान्तमावश्यकतां दर्शयितुमेव हि " क्रतो स्मर, कृतं स्मर "— इत्यस्य चरणस्य द्विरुच्चारणम् । (एतदतिरिक्तं दृश्यताम् टिप्पणी २०५) । अन्तकालिकसाधनायामीश्वरस्मरणस्यैकामुपाङ्गरूपाम् प्राणनिरोधस्य वाह्यसाधनामाख्याति योगशास्त्रम् । गीतायामपि संक्षेपेण साऽऽख्याताऽष्टमेऽध्याये । कथयितुं शक्यते —" वायुरनिलम् अमृतम् " अनेन वाक्येन तदपि सूचितमिति । अयं तस्य वाक्यस्य तृतीयोऽर्थो जातः । अन्येऽर्थाः १७३, १७४ टिप्पण्योर्व्यक्ता एव ।

(१९०) मोक्षस्य स्वरूपमस्मिन्मन्त्रे परिपूर्णतयोपस्थापितम् — (१) शरीरम् भस्मसाद्भवतु । (२) प्राणादीनि सूक्ष्मतत्वानि तत्तद्देवतासु लीनानि भवन्तु (३) ईश्वरचिन्तनेन सङ्कल्पोच्छेदो भवतु । (४) जीवः परमात्मनि मिलतु ।

(१९१) अस्मिन् मन्त्रे दर्शितस्य मोक्षस्वरूपस्य विवरणं मुण्डकोपनिषदो निम्नलिखितमन्त्रे कृतमस्ति —

गताः कलाः पञ्चदश प्रतिष्ठा
देवाश्च सर्वे प्रतिदेवतासु ।
कर्माणि विज्ञानमयश्च आत्मा
परेऽव्यये सर्वं एकीभवन्ति ॥ (मुण्डक ३।२।७)

(१९२) 'अन्तकाल ईश्वरस्मरणं भवतु ' — इति यदि युक्तियुक्ताऽऽशा क्रियेत, तर्हि तदर्थ एतदावश्यकमस्ति —'समस्तेन जीवनेन तद्भावभावितेन भाव्यम् । आदितोऽन्तम् यावत् पवित्रं निर्मलं च जीवनं यापयितुं यत्नः कर्तव्यः' । एतदर्थमागामिमन्त्रस्य प्रार्थनाऽस्ति ।

॥ १८ ॥

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ।
युयोध्यस्मज् जुहुराणमेनो
भूयिष्ठां ते नम उक्तिं विधेम ॥

अर्थः-हे मार्गदर्शक देदीप्यमान प्रभो, विश्वस्मिन् व्यूतानि तत्त्वानि सर्वाणि त्वं वेत्सि। अस्मान् सरलेन मार्गेण तं परमानन्दं प्रति नय। अनृजुगामि पापमस्मत्तो दूरं निवारय। त्वयि वयं पुनः पुनर्नम्रनिवेदनं कुर्मः।

(१९३) अत्राऽग्निरूपे प्रतीक ईश्वरध्यानं क्रियते। योऽन्तर्याम्यग्नेरुद्दीपकोऽस्ति, स मद्देहस्याऽप्युद्दीपकोऽस्ति। 'सत्य' इति तत्संज्ञा। अग्निः शरीरं च सुवर्णावरणमिति स्मर्तव्यम्।

(१९४) जीवनस्य सर्वाण्यपि गम्भीरकार्याण्यग्निसाक्ष्ये क्रियन्ते, सैषा वैदिकी रीतिः। तदनुसारमत्र मन्त्रेऽग्निश्चारित्र्यं प्रार्थितोऽस्ति । अर्थाद्यदेतदग्निसाक्ष्यं, तदस्ति चारित्र्यस्य प्रतिज्ञानम्।

(१९५) 'अग्नि' शब्दस्य निरुक्तिर्यास्केन नैकप्रकारैः कृताऽस्ति। तेषु 'अग्निः' 'अग्रणी' इति निरुक्तिरत्राऽर्थसङ्गता भवति। यतः प्रस्तुतमन्त्रेऽग्नितो मार्गनिर्देशनाऽपेक्षा विहिताऽस्ति। व्युत्पत्तिशास्त्राऽनुसारम् 'अंज' (अर्थाद् व्यक्तीभवनम्, प्रकाशनम्) धातोरग्निशब्दो निष्पन्नः। स नैकविधमपभ्रष्टरूपो कतिपयासु भाषासु प्रचलितश्चाऽस्ति। यत्किञ्चिदप्याविर्भूतम्, तत्सर्वमग्निरूपं स्मर्तव्यम। तदतिरिक्तम्— प्रकाशकत्वाच्चाऽग्निर्ज्ञानरूपोऽपि मन्यते। अतः स वेदेषु 'जातवेदस्' इति प्रस्तुतमन्त्रे 'विद्वान्' इति चाऽभिहितः। अर्थाद् विश्वरूपतो व्यक्तः, विश्वस्य तत्ववित, विश्वस्य मार्गनिर्देशकः, 'सगुणः साकारश्च' परमेश्वरः इत्यग्नेरर्थो भवति।

(१९६) **अग्ने नय सुपथा** ' सुपथा— अर्थात्सरलेन मार्गेण। कोऽसौ पन्थाः! पञ्चदशस्य मन्त्रस्य 'सत्यधर्मः'? वेदप्रतिपादिता 'ऋजुनीतिः'? योगशास्त्रस्य 'यमनियमौ'? मनोः सार्ववर्णिको 'मानवधर्मः'? जैनानां बौद्धानां च 'चारित्र्यम्'? कुरानस्य 'सिरात्वल् मुस्तकीम्'? किं वा महात्मभिरनुसृतः सरलः 'सिद्धमार्गः'? '**मारग हा सोपा सिद्धपंथ**' —तुकारामः।

(१९७) 'राये'— अर्थात् 'रै' इत्यस्य दिशि।। 'रै' 'रयि'— एतौ द्वौ शब्दौ वेदेषु पुनःपुनः प्रयुक्तौ स्तः। मूलत एकस्यैव शब्दस्यैते द्वे रूपे स्तः। तथाऽपि तयोरर्थभिन्नताऽस्ति। 'रयि' शब्दस्याऽर्थः समृद्धिर्भवति । अस्माकं ग्रामीण— [कुणबाऊ] मराठीभाषायां यो 'लई'— (अर्थाद् बहु, विपुलम्) शब्दोऽस्ति', तस्याऽधारोऽप्येष एव

वैदिको 'रयि' शब्दोऽस्ति। स्वयमुपनिषद्भिः 'रयि' शब्दस्य विवरणमेवं कृतमस्ति—**'रयिर् वै एतत्सर्वं यन्मूर्तं च अमूर्तं च'** (प्रश्नोपनिषद् १। ५)। मूर्तममूर्तं च सर्वम् 'रयिः' भवति। 'रै' शब्दो मुख्यतयाऽऽनन्दस्य वाचकोऽस्ति। तस्यैवाऽन्यद्रूपं 'रे' इत्यपि भवति। 'रेवा' शब्दे तदुपलब्धमस्ति। 'रे-वा' अर्थात् 'नर्म–दा' आनन्ददायिनी, आनन्दमयी। परम् 'रै' 'रयि' इत्यनयोर्मूलत एकत्वात्तदर्थद्वयं संयोज्याऽत्र मन्त्रे 'रै' इत्यस्यार्थः परमानन्दः कृतः।

(१९८) ईश्वरदर्शनम् [मन्त्रः १६], ईश्वरप्रवेशश्च [मन्त्रः १७] एतत् द्वयमेव परमानन्दरूपम्। अदः [एतद् द्वयम्] एव 'रयिः' अद एव 'लई' [परमम्] **'एषा अस्य परमा गतिः। एषा अस्य परमा संपत्। एषः अस्य परम आनन्दः। एतस्यैव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति'** [बृ० ४।३।३२] **'यो रायोऽवनिर्महान्'** [ऋग्वेदः १।४।१०] यः परमानन्दस्य धामरूपोऽस्ति।

(१९९) मन्ये 'रै' शब्दो धनविरोधिरूप उपस्थापितोऽस्ति। जीवनस्य साध्यम् 'रै' अस्ति, न धनम्— एतदेवाऽत्र सूचनीयमस्ति। उचितेन मार्गेण यद्यर्ज्येत, तर्हि धनमप्येकमानन्दसाधनम् भवितुं शक्नोति। परमकर्मण्यतयाऽथवा स्तेयवृत्या धनार्जनं सामाजिकस्याऽऽध्यात्मिकस्य चाऽऽनन्दस्य मूलोत्क्षेपणं भवति। एतादृशं धनं नो धनम्, तत्तु निधनम् (विनाशः) एव।

(२००) यत् (कर्म) आध्यात्मिकभाषायामुपनिषदः 'वित्तैषणात्यागः' इति कथयन्ति, वा सामाजिकभाषायां मनुः 'अर्थशुचिता' इत्यभिदधाति, तस्य प्रत्यक्षबोधो मन्त्रे प्रथमे द्वितीये च प्रदत्तः। स एव पुनरष्टमे, पञ्चदशे तथाऽन्तिमे मन्त्रे च सूचयित्वा दृढीकृतः।

(२०१) **'अग्ने नय सुपथा राये'**। 'कामं साधनं यादृशमपि भवतु, केवलं साध्येनोत्तमेन भवितव्यम्'— सोऽयं भ्रम आदिकालतोऽद्यावधि प्रचलन्नस्ति। 'सुपथा' शब्दस्तदेव निराकुर्वन्नस्ति। साधनगताऽपवित्रता साध्यं दूषयत्येवेतीदमस्ति शास्त्रम्।

(२०२) **'अस्मान्'** सामुदायिकी प्रार्थनैषा। उपान्त्ययोर्द्वयोर्मन्त्रयोः कृत एकवचनान्तः प्रयोगोऽत्रैकपदे बहुवचने परिवर्तते, अतोऽत्र ध्यानमाकृष्टं भवति। ईश्वर–दर्शनम् [मन्त्रः १६], ईश्वरप्रवेशश्च [मन्त्रः १७] [एते द्वे क्रिये] यद्यपि व्यक्तित्वस्य

लोपमेव कुरुतः, तथाऽपि तयोस्तत्तद्व्यक्तिविशेषार्थे सीमितत्वात् एते [द्वे] व्यक्तिगते एव भविष्यतः। '**मनुष्याणां सहस्रेषु**'— प्रायः कस्यचिदेव ते प्राप्ते भवितुं शक्नुतः। यस्यैते प्राप्ते भवेताम्, तस्य संसरणस्य त्वन्तो भविष्यति। परमन्येषां संसरणं त्ववशिष्टं भविष्यत्येव (योगसूत्रम् २।२२) । किन्तु चारित्र्यसाधनाया वार्ता नेदृश्यस्ति । सा तु साधना सामुदायिक्येव भवितुं शक्नोति, तथा कर्तव्या च । सामुदायिकरूपेण कृतायामेव हि सा (साधना) पूर्णा भवति, विचारनिष्कर्षपरिशुद्धा च। तत एव सा सुलभाऽपि भवति, '**एकमेकां करूं साह्य। अवघे धरूं सुपन्थ**– 'परस्परं कृतसाहाय्या वयं सर्वे सुमार्गेण प्रयाम'– तुकारामः। एवमेव सामुदायिकसाधनायाः सुमार्गोऽस्ति।

(२०३) गते पञ्चदशे मन्त्रे प्रार्थना सत्यधर्मस्य दर्शनस्य विषयेऽस्ति। अत्र सा (प्रार्थना) सत्यधर्मस्याऽवरगस्य विषयेऽस्ति।

(२०४) 'वयुनानि'। 'वे' अर्थाद व्यूतिः, ग्रथनम्, अनुस्यूतिः। तस्मिन् 'अन' 'उन' इति प्रत्यययोगात् 'वयन' 'वयुन' इत्येतौ शब्दौ निष्पद्येते। 'वयनम्'— अर्थात्तन्तुसन्तानक्रिया। 'वयुनम्'— अर्थाद्वयनकर्म, ग्रथनम्, अनुस्यूतिः, जीवनेऽनुस्यूतं वा व्यापकं तत्त्वम्। एवमनुस्यूतीनां वयुनानां वा यस्यां मात्रायां ज्ञानं भवति तस्यामेव मात्रायां कर्तव्यमार्गः स्पष्टो भवति। यथा प्राणिमात्रे जिजीविषा भवति (मन्त्रः २), अस्मिन् वयुने बुद्धिपथं प्राप्त एवाऽहिंसाधर्मः (सर्वजिजीविषानुकूलः) प्रवाहरूपेणैव प्राप्तो भवति। अहम्, तथाऽन्यानि भूतानि मिथो मिलिताः स्म इति (मन्त्रः ६)। अस्मिन् वयुनेऽनुभूते नैतस्य कथनस्यैवाऽवश्यकताऽस्ति— 'न कोऽप्यन्यं तिरस्कुर्याज्जुगुप्सेत वेति'।

(२०५) '**युयोधि**'—'यु'– (दूरीकरणम्) धातोरिदं रूपमिति मन्यते। परं यदि 'युध्'– (अर्थाद् योधनम्) धातोरपि रूपमेतन्निष्पद्येत, तर्ह्यपि वैदिकं व्याकरणं नैव बाधिष्यते। अतो द्वावप्यर्थौ योजयित्वा 'विद्रावणम्' इति कृतोऽस्याऽर्थः समुचितो भवति। साधकेनेश्वरस्मरणपूर्वकं निरन्तरं पापेन सह योद्धव्यमित्यस्याः प्रार्थनायास्तात्पर्यं भवति।

'तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च'

—[गीता ७। ७]

"रात्रीदिवस आम्हां युद्धा चा प्रसंग। अन्तर्बाह्य जग आणि मन"—तुकारामः

(२०६) '**जुहुराणम् एनः**' अर्थात्कुटिलगामि पापम् । अनृजुगाम्येव पापं भवति । ऋजुता पुण्यम्, अनृजुता पापम् । इतोऽन्या पापपुण्ययोर्व्याख्या याथार्थ्येन का नाम कर्तुं शक्येत ! वेदेषु पापस्य 'दुरितम' इति, पुण्यस्य 'सुदितम्' इति च संज्ञे प्राय आयातः । अक्षरश एतयोरर्थौ क्रमाद् भवतः — 'ऋजुतया गमनम, अनृजुतया गमनं च' ।

(२०७) '**जुहुराणम्**'—("ह्वृ" कुटिलगतौ इत्यतः) कुटिलगामि । व्यूतिसमये वेम्न आघातेन सरलेन भाव्यम् । यदि हस्तः कुटिलाऽघातेऽभ्यस्तः स्यात्, तदा वयनमेव कुटिलं भवति, (तथात्वे) वस्त्रस्य सरलतायै मध्ये मध्ये तन्तवः पुनर्योजनीयाश्च भवन्ति । एषैव सर्वा पापप्रक्रिया । 'वयुन' 'जुहुराण' शब्दौ वयनपरिभाषां सूचयतः ।

(२०८) '**भूयिष्ठां ते नमउक्तिं विधेम**' । व्रतप्रतिज्ञायै नम्रतायाः साहाय्यमावश्यकमस्ति । प्रतिज्ञायास्तथा नम्रतायाः साहाय्येन व्रतरक्षा भवति । 'एषैव राम–रक्षा,' एतदेव 'अग्निसाक्ष्यम्' ।

(२०९) स्वल्पे स्तोकपाठभेदे इयमुपनिषद् यजुर्वेदस्यान्तिमोऽध्यायोऽस्ति । अतो यद्यप्ययं मन्त्रो यजुर्वेदगतोऽस्ति, तथाऽप्ययं मूलयजुर्वदे पठितोऽपि ऋग्वेदादवतीर्णोऽस्ति [ऋग्वेदः १ । १८९ । १] । निन्दिते कर्मणि हस्तेन क्रियमाणेऽथवा कस्माच्चिन्मार्गाद् भ्रंशे जाते, शास्त्रेऽस्य जपो विहितोऽस्ति । (प्रायश्चित्तार्थम्) परन्त्वयमभून्नैमित्तिको विनियोगः । वस्तुत एष मन्त्रो जीवने नित्यमार्गदर्शकत्वेन सहायकोऽस्ति ।

(२१०) माध्यन्दिनपाठस्यान्ते '**ॐ खं ब्रह्म**' इत्येष निर्देशः कृतः । तन्मध्ये 'ॐ कारस्य सङ्ग्रहः सप्तदशे मन्त्रे जातोऽस्ति । ब्रह्मपदं स्वशब्देन (अर्थाद् ब्रह्म-शब्देन) नोल्लिखितम्, तथापि चतुर्थपञ्चमयोर्मन्त्रयोर्नपुंसकलिङ्गी प्रयोगस्तदेव लक्ष्यीकरोति [टिप्पणी ५४] । 'खम्' अर्थादाकाशवद्व्यापकम् । एतदुपासनाऽर्थे स्मरणीयम् । अन्यथा ब्रह्मणो व्याप्तौ तस्य कुत्राऽपि गणनैव न भवति [दृश्यताम टिप्पणी ६७] ।

(२११) षोडशादासप्तदशैर्मन्त्रैर्ध्यानत्रयी भवति, तेन चिन्तनं संपूर्णं भवति । 'भूः भुवः स्वः' एतास्तिस्रो मात्राः 'ॐ' कारस्य । 'पृथ्वी, अन्तरिक्षम्, स्वर्गः'— अयं तेषामाधिभौतिकोऽर्थः । 'अग्निः, वायुः, सूर्यश्च तेषामधिदेवताः । 'शरीरं प्राणाः, बुद्धिश्च'— तेषामध्यात्मविषयाः ।

(२१२) षोडशादासप्तदशेषु मन्त्रेषु प्रयुक्तानां 'सूर्यानिलाऽग्नि' शब्दानामर्थः कथं कर्तव्यः ? वेदस्य चिन्तनेऽयं प्रश्नोऽनवरतमायाति । यतो वेदा एतासामेतादृशानां वा देवतानां

सूक्तैः परिपूर्णाः सन्ति । किं यथा श्रूयन्ते, ताः सर्वा देवताः पृथक् पृथक्स्मरणीयाः अस्योत्तरं स्वयं वेदेनैवं प्रदत्तम् — **'एकं सद् विप्रा बहुधा वदन्ति'** परमेश्वर एकोऽस्ति । उपासकैः सोऽनेकैर्नामभिः संज्ञातः । यद्येवं, तर्हि यस्मिन् प्रेमाऽस्ति तेनैकेनैव केनाऽपि नाम्नोपासकः स्वमासज्जयेत् । परं वेदेषु त्वेक एवोपासकोऽप्यनेकानि नामानि गृह्णानो दृश्यते । ईशावास्येऽप्येष एव क्रमोऽस्ति । कीदृश्यसौ समस्या ? नैषा समस्या, अपि तु समाधानमेतत् । संपूर्णः परमेश्वर एकस्यामेवाऽभिव्यक्तौ न माति । अतः वयं प्रथमं तस्य भिन्नभिन्ना अभिव्यक्तीर्विश्लेषयाम । तदनु ताः सर्वाः संश्लेषयाम । तदनन्तरं च ततोऽपि पारं गताः 'सोऽहमस्मि' इत्यनुभवे विलीयामहै । एवं सा परिपूर्णोपासनाप्रक्रिया भवति, या षोडशे मन्त्रे विवृता । अग्निवाचकस्य वैश्वानरशब्दस्य चर्चां कुर्वता वेदार्थमीमांसाऽऽचार्येण जैमिनिनोक्तम् — अक्षरार्ऽर्थतोऽपि यदि वैश्वानरशब्दः साक्षादीश्वरवाचकः स्मर्यते, तर्ह्यपि न काचिदापत्तिः [ब्र० सू० १ । २ । २८] । अनयैव न्यायव्याप्त्या 'सूर्यः' अर्थाद् वाच्याऽर्थतः प्रेरकः परमेश्वरः, 'अनिलः' अर्थाद् वाच्याऽर्थतश्चैतन्यमयः परमेश्वरः, 'अग्निः' अर्थाद् वाच्याऽर्थतो देदीप्यमानो मार्गदर्शकः परमेश्वर इत्येतेषामर्थानां ध्यानेन सर्वं स्पष्टं भवति । परं तथात्वेऽपि सूर्यादीनां विशिष्टानामभिव्यक्तीनां विस्मरणं नैव कर्तव्यम् । एवमेतद् व्यापकं समन्वयदर्शनमस्ति ।

(२१३) उपनिषदादीनां समाप्तावन्तिमस्यैकस्य पदस्य द्वयोर्वा द्विरुक्तिक्रमोऽस्ति । स शास्त्रीयभाषायां 'पदाभ्यासः' इति कथ्यते । स समाप्तेः सूचकश्च मन्यते । एवं पदाभ्यास ईशावास्यस्याऽन्ते नो दृश्यते । परं स सप्तदशे मन्त्रे लभ्यते । मन्ये— एकप्रकारेण 'ईशावास्योपनिषद् तत्रैव समाप्यते च । यतोऽयमष्टादशो मन्त्र ईशावास्योपनिषदा विषयपूर्तये ऋग्वेदात्स्पष्टमुद्धृतोऽस्ति । तमन्तरेणेशावास्योपनिषद्विवेचनमपूर्णमेव भवति । अतः स ईशावास्योपनिषदोऽङ्गीभूत एवाऽस्ति, न तु पश्चात्संवर्धितः । परमष्टादशस्य मन्त्रस्याऽन्ते किमर्थं पदाऽभ्यासो नाऽस्ति ? इत्येतदेवं ध्यानगतम् भवति— नियमानुसारम् तथा पदाऽभ्यासाऽभावेऽपि तस्य [पदाभ्यासस्य] स्थाने तदन्तर्गतानि 'भूयिष्ठां ते नमउक्तिम्' इति पदानि ग्रन्थपरिसमाप्तिं सूचयन्ति ।

ईशावास्योपनिषद्

[मूलम्, पदपाठोऽर्थश्च]

शान्तिमन्त्रः

ॐ। पूर्णमदः पूर्णमिदम्
पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय
पूर्णमेवाऽवशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः

पद्पाठः— पूर्णम्, अदः, पूर्णम्, इदम्, पूर्णात्, पूर्णम्, उदच्यते । पूर्णस्य, पूर्णम्, आदाय, पूर्णम्, एव, अवशिष्यते ।

अर्थः— तत् पूर्णमस्ति, एतत्पूर्णमस्ति । पूर्णात्पूर्णं निष्पन्नं भवति । पूर्णाद्यदि पूर्णमुदच्येत, तर्ह्यपि पूर्णमेवाऽवशिष्टं भवति ।

ॐ शान्तिः शान्तिः शान्तिः

॥ १ ॥

ॐ। ईशावास्यमिदं सर्वम्
यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा
मा गृधः कस्यस्विद्धनम् ॥

पद्पाठः— ईशावास्यम्, इदम्, सर्वम्, यत्, किम्, च, जगत्याम्, जगत्। तेन, त्यक्तेन,भुञ्जीथाः, मा, गृधः, कस्यास्वित्, धनम्।

अर्थः— हरिः ॐ। जगति यत्किमपि जीवनमस्ति, तदीश्वरेण वासितमस्ति। अतस्तन्नाम्नि त्यागं कृत्वा, त्वं यथाप्राप्तं भुङ्क्ष्व। कस्यचिदपि स्वत्वे वासनां मा बधान।

॥ २ ॥

कुर्वन्नेवेह कर्माणि
जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति
न कर्म लिप्यते नरे ॥

पद्पाठः— कुर्वन्, एव, इह, कर्माणि, जिजीविषेत्, शतम्, समाः। एवं, त्वयि, न, अन्यथा, इतः, अस्ति, न, कर्म, लिप्यते, नरे।

अर्थः— इह लोके कर्माणि कुर्वन्नेव शतं वर्षाणि जीवितुमिच्छ स एष पन्थास्तव देहवतः। नाऽस्त्यतो भिन्नो मार्गः : मनुष्येण सह फलवासनैव सक्ता भवति, न कर्म।

॥ ३ ॥

असुर्या नाम ते लोका
अन्धेन तमसावृताः ।
ताँस्ते प्रेत्याऽभिगच्छन्ति
ये के चाऽत्महनो जनाः ॥

पदपाठः- असुर्याः, नाम, ते, लोकाः, अन्धेन, तमसा, आवृताः । तान्, ते, प्रेत्य, अभिगच्छन्ति, ये, के, च, आत्महनः, जनाः ।

अर्थः- आत्मज्ञानेन सह वैरायमाणा य आत्मघातिनो जनाः स्युः, ते देहपातमनु प्रगाढेनाऽन्धकारेण व्याप्तामासुरीं योनिमभि गच्छन्ति ।

॥ ४ ॥

अनेजदेकं मनसो जवीयो
नैनद् देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्
तस्मिन्नपो मातरिश्वा दधाति ॥

पदपाठः- अनेजत्, एकम्, मनसः, जवीयः, न, एनत्, देवाः, आप्नुवन्, पूर्वम्, अर्षत् । तत्, धावतः, अन्यान्, अत्येति, तिष्ठत्, तस्मिन्, अपः, मातरिश्वा, दधाति ।

अर्थः- तदात्मतत्त्वमेकमेवाऽस्ति । तत् एकान्ततो निश्चलं, परं मनसोऽप्यधिकं वेगवच्चाऽस्ति । नैनद् देवा ग्रहीतुमलम् । तेन त्वनादिकालतो देवा गृहीताः सन्तिः । तिष्ठदेव तद् धावतोऽपरानतिगच्छति । मातुः प्रकृतेरुत्सङ्गे क्रीडन् प्राणवायुस्तस्यैव सत्तायां चलति ।

॥ ५ ॥

तदेजति तन्नैजति
तद् दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य
तदु सर्वस्यास्य बाह्यतः ॥

पदपाठः– तत्, एजति, तत्, न, एजति, तत्, दूरे, उ, अन्तिके । तत्, अन्तर्, अस्य, सर्वस्य, तत्, उ, सर्वस्य, अस्य, बाह्यतः ।

अर्थः– तत् चलति, न चलति च । तद् दूरेऽस्ति. अन्तिके चाऽस्ति । तत् सर्वस्यैव अन्तरस्ति तथा बहिश्चाऽस्ति ।

॥ ६ ॥

यस्तु सर्वाणि भूतानि
आत्मन्येवाऽनुपश्यति ।
सर्वभूतेषु चाऽत्मानं
ततो न विजुगुप्सते ॥

पदपाठः– यः, तु, सर्वाणि, भूतानि, आत्मनि, एव, अनुपश्यति । सर्वभूतेषु, च आत्मानम्, ततः, न, विजुगुप्सते ।

पदपाठः– यो निरन्तरमात्मन्येव समस्तभूतानि पश्यति समस्तभूतेषु चाऽत्मानम्, स न कस्माच्चिदप्युद्विग्नो भवति ।

॥ ७ ॥

यस्मिन् सर्वाणि भूतानि
आत्मैवाऽभूद्विजानतः
तत्र को मोहः कः शोकः
एकत्वमनुपश्यतः ।

पद्पाठः– यस्मिन्, सर्वाणि, भूतानि, आत्मा, एव, अभूत्, विजानतः । तत्र, कः, मोहः, कः, शोकः, एकत्वम्, अनुपश्यतः ।

अर्थः– यस्य दृशि सर्वाण्येव भूतान्यात्मायन्ते, निरन्तरमेवमेकत्वं भावयतस्तस्य विज्ञानिनः पुरुषस्य कुतो मोहः कुतो वा शोकः !

॥ ८ ॥

स पर्यगाच्छुक्रमकायमव्रणम्
अस्नाविरं शुद्धमपापविद्धम् ।
कविर् मनीषी परिभूः स्वयम्भूः
याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥

पद्पाठः- स, पर्यगात्, शुक्रम्, अकायम्, अव्रणम्, अस्नाविरम्, शुद्धम्, अपापविद्धम् । कविः, मनीषी, परिभूः स्वयम्भूः, याथातथ्यतः, अर्थान्, व्यदधात्, शाश्वतीभ्यः, समाभ्यः ।

पद्पाठः- स तेजस्वि, देहरहितम्, अत एव व्रणादिदेहदोषैः स्नाय्वादिभिर्देहगुणैश्च सर्वथाऽलिप्तम्, शुद्धम्, पापवेधमुक्तम् चैतादृशं तदात्मतत्त्वं सर्वतः परिवेष्ट्य स्थितोऽस्ति। स कविरर्थात् क्रान्तदर्शी, वशी, व्यापकः, स्वतन्त्रश्चाऽस्ति । स शश्वत्स्थास्नूत्सर्वानर्थान् यथावदसाधयत् ।

॥ ९ ॥

अन्धं तमः प्रविशन्ति ये अविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायां रताः ॥

पदपाठः– अन्धम्, तमः, प्रविशन्ति, ये, अविद्याम्, उपासते । ततः, भूयः, इव, ते, तमः, ये, उ, विद्यायाम् रताः ।

अर्थः– येऽविद्यायां निमग्नाः, ते घोरमन्धकारमभि चलिताः । ये विद्यायां रताः, मन्ये ते तु घोरादपि घोरमन्धकारमभि चलिताः ।

॥ १० ॥

अन्यदेवाहुरविद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस् तद् विचचक्षिरे ॥

पदपाठः– अन्यत्, एव, आहुः, विद्यया, अन्यत्, आहुः, अविद्यया, इति, शुश्रुम, धीराणाम्, ये, नः तद्, विचचक्षिरे ।

अर्थः– आत्मतत्त्वं खलु विद्यातो भिन्नमेव कथितम्, अविद्यातश्च । तेभ्यो धीरपुरुषेभ्योऽस्माभिरेवं श्रुतम्, येऽस्मान् तत् (आत्मतत्त्वम) दर्शितवन्तः ।

॥ ११ ॥

विद्यां चाऽविद्यां च यस् तद् वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥

पदपाठः– विद्याम्, च, अविद्याम्, च, यः, तत्, वेद्, उभयम्, सह । अविद्यया, मृत्युम्, तीर्त्वा, विद्यया, अमृतम्, अश्नुते ।

अर्थः- ये नाम विद्ययाऽविद्यया च सह तदात्मतत्त्वम् जानीयुः, ते तस्यैवाऽत्मतत्त्वस्य साहाय्येनाऽविद्यया मृत्युमुल्लङ्घ्य, विद्ययाऽमृतं प्राप्नुवन्ति ।

॥ १२ ॥

अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्यां रताः ॥

पद्पाठः— अन्धम्, तमः, प्रविशन्ति, ये, असंभूतिम्, उपासते । ततः, भूयः, इव, ते, तमः, ये, उ, संभूत्याम्, रताः ।

अर्थः— ये निरोधे निमग्नास्ते गाढेऽन्धकारे प्रविष्टाः । ये च विकासे रताः, मन्ये—ते तु ततोऽपि निविडेऽन्धकारे प्रविष्टाः ।

॥ १३ ॥

अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां ये नस् तद् विचचक्षिरे ॥

पद्पाठः— अन्यत्, एव, आहुः, संभवात्, अन्यत्, आहुः, असंभवात् । इति, शुश्रुम, धीराणाम्, ये, नः, तत्, विचचक्षिरे ।

अर्थः— आत्मतत्त्वं विकासाद् भिन्नमस्ति, निरोधाच्चेति कथितम् । अस्मान् ये तत्साक्षात्कारितवन्तः, तेभ्यो धीरेभ्यः पुरुषेभ्योऽस्माभिरेवमाकर्णितम् ।

॥ १४ ॥

संभूतिं च विनाशं च यस् तद् वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥

पद्पाठः- संभूतिम्, च, विनाशम्, च, यः, तत्, वेद, उभयम्, सह । विनाशेन, मृत्युम्, तीर्त्वा, संभूत्या, अमृतम्, अश्नुते ।

अर्थः- विकासेन निरोधेन च समं ये तदात्मतत्त्वं विदन्ति, ते तस्याऽत्मतत्त्वस्य साहाय्येन निरोधतो मृत्युं तीर्त्वा विकासतोऽमृतं प्राप्नुवन्ति ।

॥ १५ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत् त्वं पूषन्नपावृणु सत्य-धर्माय दृष्टये ॥

पदपाठः— हिरण्मयेन, पात्रेण, सत्यस्य, अपिहितम्, मुखम् । तत्, त्वम, पूषन्, अपावृणु सत्यधर्माय, दृष्टये ।

अर्थः— सुवर्णमयपात्रेण सत्यस्य मुखम् पिहितं भवति । हे विश्वपोषक प्रभो, सत्यधर्मोपासकस्य दर्शनार्थिनो मम कृते तत् त्वमुद्घाटय ।

॥ १६ ॥

पूषन्नेकर्षे यम सूर्य
प्राजापत्य व्यूह रश्मीन् समूह ।
तेजो यत् ते रूपं कल्याणतमं, तत् ते पश्यामि,
योऽसावसौ पुरुषः सोऽहमस्मि ॥

पदपाठः- पूषन्, एक–ऋषे, यम, सूर्य, प्राजापत्य, व्यूह, रश्मीन्, समूह । तेजः, यत्, ते, रूपम्, कल्याणतमम्, तत्, ते, पश्यामि, यः, असौ, पुरुषः, सः, अहम्, अस्मि ।

अर्थः- त्वमस्य विश्वस्य पोषकोऽसि, एक एव निरीक्षकश्च । त्वं नियमनकर्तोत्तम-प्रवर्त्तनकर्ता चाऽसि । त्वं सर्वस्य प्रजावत्पालकोऽसि । त्वमात्मीयान् पोषकान् रश्मीन् उद्घाट्य, एकत्रकृत्य दर्शय । तव तदोजस्वि परमकल्याणमयं च रूपमितोऽहं पश्यन्नस्मि । परात्परो यः पुरुषोऽस्ति, सोऽहमस्मि ।

॥ १७ ॥

वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।
ॐ क्रतो स्मर, कृतं स्मर, क्रतो स्मर, कृतं स्मर ॥

पदपाठः- वायुः, अनिलम्, अमृतम्, अथ, इदम्, भस्मान्तम्, शरीरम्। ॐ, क्रतो, स्मर, कृतम्, स्मर, क्रतो, स्मर, कृतम्, स्मर।

अर्थः- एते प्राणास्तस्मिन् चैतन्यमयेऽमृततत्त्वे लीना भवन्तु, शरीरं च भस्मसाद्भवतु। हे दृढसङ्कल्पमय जीव ! सनामोच्चारमीश्वरं स्मर, तच्चरितं स्मर। हे [मम] जीव ! स्मर, [स्वं सङ्कल्पं त्यक्त्वा] तच्चरितं स्मर।

॥ १८ ॥

अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो
भूयिष्ठां ते नमउक्तिं विधेम ॥

पदपाठः- अग्ने, नय, सुपथा, राये, अस्मान्, विश्वानि, देव, वयुनानि, विद्वान्। युयोधि, अस्मत्, जुहुराणम्, एनः, भूयिष्ठाम्, ते, नमउक्तिम्, विधेम ॥

अर्थः- हे मार्गदर्शक देदीप्यमान प्रभो, विश्वस्मिन् व्यूतानि तत्त्वानि सर्वाणि त्वं वेत्सि। अस्मान् सरलेन मार्गेण तं परमाऽऽनन्दं प्रति नय। अनृजुगामि पापमस्मत्तो दूरं निवारय। त्वयि वयं पौनःपुन्येन नम्रनिवेदनं कुर्मः।

ॐ। पूर्णमदः पूर्णमिदम्
पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय
पूर्णमेवाऽवशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः

लेखकस्याऽन्याः कृतयः--

(१) सत्यहरिश्चन्द्रम् (महाकाव्यम्, संस्कृते)

(२) विश्वे देवाः (लघिष्ठकाव्यसङ्ग्रहः, संस्कृते)

(३) तदर्थमेव (नेपालकविकुलतल्लजस्य श्री म. वी. वि. शाहस्य "उसैको लागि" इति कवितासङ्ग्रहस्याऽनुवादः, संस्कृते)

(४) एक्काईसकथा (कवितासङ्ग्रहः, नेपाल्याम्)

(५) झिल्का (भावनात्मकलघुकथासङ्ग्रहः, नेपाल्याम्)

(६) म लोग्ने हुं (लघुकथासङ्ग्रहः, नेपाल्याम्)

(७) अगुल्टो (कवितासङ्ग्रहः, नेपाल्याम्)

मुद्रकः-
फाइन आर्ट प्रिन्टिङ्ग प्रेस, बटु चिकंअट फोन १२०३०